न प्रजायां न वैराग्ये न धर्मे न पराक्रमे।
न त्रिवर्गे न नैपुण्ये न नृपादौ न भेषजे॥
न च स्त्रीगर्भगमने न देहे मलसंप्लवे।
नास्ति रक्ते न वर्णेऽस्ति न प्रमाणे न लोमसु॥
शूद्रब्राह्मणयोर्भेदो मृग्यमाणोऽपि यत्नतः।
नेक्ष्यते सर्वधर्मेषु संहतैस्त्रिदशैरपि॥"

इत्यादिसन्दर्भेष्वित्यर्थः।

सञ्ज॰ "इति रामानुजीयाः, अथ यत्र तदुपदेश्याश्च हीनवर्णोपदेश्याः कथं कल्याणभागिनः स्युः? इत्यस्मत्प्रश्नस्य यथा कौशिकादयः शौनकादयो मुनय इति दृष्टान्तविधयोत्तर-दानेनास्मान् सन्तोष्य कस्मिंश्चित् सम्प्रदायप्रवर्तके ब्राह्मणभिन्ने ब्राह्मणत्वप्रापणद्वाराऽऽचार्य्यत्वोपपादनार्थं किंचेत्यादिना त्रिधा ब्राह्मणत्वं स्वयं निरुच्य तत्रातिव्याप्त्यादिदोषैः स्वयं संखण्ड्य जातिनैरपेक्ष्येण शमदमादियुक्तस्याब्राह्मणकुलोत्पन्नस्यापि ब्राह्मणत्वं तत्राचार्य्यत्वमपीति सिद्धान्तितम्। तत्रास्मत्कृत-जिज्ञासाविषयताऽभावेऽपि भवद्रचितवाक्यवैदग्ध्यकौतूहलतया किञ्चिदुच्यते,—यत्तावदत्र किं तद् ब्राह्मणाद् ब्राह्मण्याम् इत्या-दिना त्रिधापि ब्राह्मणलक्षणातिव्याप्त्यादिकमुक्तं, तदनिन्द्य-वैवाहिकविधिपरिगृहीतासु सवर्णासु ब्राह्मणीषूत्पादितत्व-तपोमाहात्म्यमुनिवाक्य-प्रभावजनितत्वान्यतरत्वे सति श्रौतस्मार्त-कर्माधिकारित्वं मिताक्षराद्याकरग्रन्थोक्त-तल्लक्षणमनालोच्यैवेति प्रतिभाति।

"जात्युत्कर्षो युगे ज्ञेयः" इत्यादिवचनेनापि षष्ठ्यां पञ्चम्यां चतुर्थ्यां च सवर्णत्वं विधायैवेति तासूत्पादितेषु सप्तमषष्ठ-पञ्चमेष्वपि नैतल्लक्षणाव्याप्तिः। विश्वामित्र-वीतिहोत्रादौ तु तपो-मुनिवाक्यादिप्रभावेणैव ब्राह्मणत्वजननेन नाव्याप्तिशङ्कापि। न च शठकोपादावपि तपोमाहात्म्यजनित-ब्राह्मणत्वमस्तीति वाच्यम्, तस्य शूद्रजातीयतया तपोऽनधिकारात्। अतएव तदीय-तपोमाहात्म्यं शिष्टैर्न क्वाप्यबोधि, विश्वामित्रीय-तपोमाहात्म्यवत्।

यच्च, योऽनधीत्येत्यादिना सिद्धान्तितमित्यन्तेन ग्रन्थेन मनुभारताद्युक्तप्रमाणोपन्यासविशिष्टेन शमदमादिगुणविशिष्ट-पिण्डमात्रे ब्राह्मण्यं, तद्विपरीते तु वैपरीत्यमिति सिद्धान्तितम्, तत् तत्तन्मनुभारतवाक्यानां स्वकर्मत्यागे महान् दोषस्तदाचरणे च महान् गुणः मोक्षकामानां ब्राह्मणातिरिक्तानामपि शमदमादिस्वाप्रतिषिद्धकर्माचरणेन मोक्षप्राप्तिहेतुभूतं ब्राह्मण्यं कालान्तरे भविष्यतीत्येतदभिप्रायकत्वेनोपपत्तिसम्भवे सर्वथा ब्राह्मणत्वादिविभागोच्छेदकपरत्वकल्पनस्यान्याय्यत्वेन च न सतां मनोरममिति भवद्भिरेव स्वस्थचित्तैर्विभाव्यताम्। अतो दया-सत्यादिलिङ्गेन जन्मान्तरीय-तपोविशेषाद्यनुमानेन जन्मान्तरीय-ब्राह्मण्यं विभाव्य विद्यमानजन्मनि ब्राह्मण्याधिकारे आचार्यत्वादौ योजनमिति महानन्यायः। भवत्सम्प्रदाये ह्यस्ति चेत् त्यज्यतामिति विज्ञप्तिरेषा बद्धाञ्जलीनामस्माकम्। अतएव भारते तुङ्गोपाख्याने श्रीकृष्णवाक्यं "यज्जातीय-शरीरं स्वीक-

त्वाहं प्रादुर्भवामि तज्जातीयमेव धर्ममनुतिष्ठामि, न तु जन्मान्तरस्वीकृतान्यजातीयशरीरावच्छेदेनानुभूत-स्मृतयदसद्धर्मं विद्यमानजन्मनि प्रवर्तयामि, तथा सति सकलजातिविभागोच्छेदः स्यादिति, यदि चानधिकृतमयोग्यं चेश्वरोऽप्यहं बोधये, न तदाचरणीयं सद्धर्मवेदिभिः' इति ; अतएव च बुद्धशरीरो भगवानपि अयोग्यं बोधयन् गर्हतां प्रापेति प्रसिद्धमेव। तन्मुखानवलोकनादि पतञ्जलिरप्याह,

'यदुदुम्बरवर्णानां घटानां मण्डलं महत्।
पीतं न गमयेत् स्वर्गं किं तत् क्रतुगतं नयेत्॥'

प्रमत्तगीत एषस्तत्रभवतोद्यः, यस्त्वप्रमत्तगीतस्तत्प्रमाणम् इति। किं च जन्मान्तरीय-योग्यतामादाय शूद्रस्याचार्य्यत्वाधिकारे भवदुक्तरीत्या स्थिते किमिति दत्तात्रेयो भगवान् तदनधिकारभिया गुरुमुपाश्रये इत्यर्थकवाक्योपन्यासे वृद्धेति पदमुपसंगृहीतवान्? किं च भवदुक्तरीत्या जन्मान्तरीय-योग्यतामादाय ब्राह्मणातिरिक्तस्याप्याचार्य्यत्वं भवेत् यदि, तदा व्यासवीर्य्योद्भवस्य दासीपुत्रस्यापि विदुरस्य धर्मावतारस्य जन्मान्तरीय-ब्रह्मविद्याप्रवचनाधिकारिविशेषणीभूतसाधनसम्पत्तावपि धृतराष्ट्रं प्रति स्वस्मिन् ब्रह्मविद्योपदेशानधिकारवचनं कथं सङ्गच्छते। तथा हि भारते धृतराष्ट्रं प्रति विदुरस्य वाक्यम्,—

"शूद्रयोनावहं जातो नातोऽन्यद्वक्तुमुत्सहे।
कुमारस्य तु या बुद्धिर्वेद तां शाश्वतीमहम्॥
ब्राह्मीं हि योनिमापन्नः सुगुह्यमपि यो वदेत्।

न तेन गर्ह्यो देवानां तस्मादेतद् ब्रवीमि ते ॥"

इति। अतो जन्मान्तरीय-योग्यतामादाय शूद्रचाण्डालसाधारण्येनाचार्य्यत्वप्रतिपादनमीश्वरोऽपि नाङ्गीकरोति किमिति भवद्भिर्वितण्डावादेन सकलसद्धर्मं विप्लावितुं बद्धपरिकरैरुद्योग्यते इति तत्खण्डनम्" इति।

व्या० 'कस्मिंश्चित् सम्प्रदायप्रवर्त्तके ब्राह्मणभिन्ने इत्यादि सिद्धान्तितम्' इत्युक्तं तदसत्, न हि ब्राह्मणभिन्ने ब्राह्मणत्वं केनचित् प्रापयितुं शक्यते, जलेऽग्नित्वमिव किं पुनः

"भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्त्तते।
स विप्रेन्द्रो मुनिः श्रीमान् स यतिः स च पण्डितः ॥"

इत्यादिवराहपद्मपुराणादिप्रतिपन्न-ब्राह्मणत्ववति ब्राह्मणत्वमस्ति, न तु नेत्यमिति बोध्यन्ते भवन्तः। किं चाब्राह्मणकुलोत्पन्नस्यापि विश्वामित्रादेर्ब्राह्मणत्वमनुभूयत एव शास्त्रप्रामाण्य-स्वीकर्तृभिरास्तिकैर्भवद्भिः। तत्रास्मदित्यादि, जिज्ञासाविषयत्वाभावेऽपि जिज्ञासाविषयीभूतार्थनिरूपितप्रासङ्गिकत्ववतो ब्राह्मणत्वस्य निरूपणमावश्यकमेव। यत्तु तदपीत्यादि प्रतिभातीत्युक्तं, तेनानुगत-धर्मनिर्वचन-कुशलता आविष्कृता भवति भवताम्; वैवाहिकविधिनाऽन्येन परिगृहीतायां ब्राह्मण्यामन्योत्पादितस्याप्यन्यतरत्वघटक-प्रथमधर्मवतः संग्रहापत्तेः, वैवाहिकविधिना स्वपरिगृहीतायां स्वोत्पादितत्वविवक्षायां च कथमनुगमः स्वत्वस्याननुगमात्; कथञ्चित् सम्बन्धकोटौ परिचयार्थं स्वत्वं निवेश्य तदनुगमः क्रियते, यदि, वैवाहिक-

विधिना स्वपरिगृहीत-स्त्रीप्रसूतस्वोत्पादितोभयसम्बन्धेन पुरुषवत्त्वमेव प्रथमधर्मः इति, तदा गोपित-शूद्रकुलोत्पत्तिके ब्राह्मणकुलोचितविधिना परिगृहीतायां ब्राह्मण्यां तेनोत्पादितस्य संग्रहापत्तेः; एतदुक्तं भविष्यत्पुराणे षष्ठीकल्पे ४२ अध्याये,—

"इममर्थं पुरा पृष्टो ब्रह्मा शिष्यैर्मनोषिभिः।
यदुक्तं तेन तेषां तु तत्ते वच्मि निबोध मे॥
सुरश्रेष्ठं सुखासीनमभिगम्य महर्षयः।
प्रणम्योचुर्महाबाहो! विश्वामित्रस्य विप्रताम्॥
दृष्ट्वा विस्मयमागत्य कौतूहलसमन्विताः।
भक्तिश्रद्धाप्रबोधाय प्रणामानतकन्धराः॥

ऋषय ऊचुः।

ब्राह्मणानधिकृत्येह ब्राह्मण्यं ब्रूहि किं भवेत्।"

इत्यादिना पृष्टो ब्रह्मा हि तत्तद्वादिभिरुक्तानां विकल्पानां खण्डनावसरे,

"येऽन्येऽपि वृषलाः केचित् तेऽपि वेदमधीयते,
शूद्रा देशान्तरं गत्वा ब्राह्मण्यं चत्वताश्रिताः।
व्यापाराकारनामाद्यैः विप्रतुल्यैः प्रकल्पितैः॥
वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम्।
ओद्वहन्ति शुभां कन्यां शुद्धब्राह्मणजां नराः॥
अथ वाधीत्य वेदांश्च चत्त्रवेषधरा नराः।
गौड़पूर्बकतामेत्य जातिं वा दाक्षिणात्यजाम्॥"

इत्यादिना। न हि भवदुक्तानुगतरूपं ब्रह्मशिष्या महर्षयोऽजानन् यतस्तेषां विश्वामित्रविप्रतादर्शनेन विस्मयो जातः ; नापि ब्रह्मणोऽपि तज्ज्ञानमस्ति, तत्सत्त्वे हि तादृशानुगतधर्ममेवोपदिशेत्, विधिना ब्राह्मणेन परिगृहीतायां तेनोत्पादितत्वमिति। पूर्वोक्तरीत्याऽनुगमे त्वात्माश्रयः ब्राह्मणत्वस्य विचारविषयस्य शरीरे ब्राह्मणत्वानुप्रवेशात् दुर्वारः।

किं च तादृशानुगमशरीरे यस्य यस्य ब्राह्मणत्वं वक्तव्यं तस्यापि निवेशे भवदनभिमतसिद्धिर्दुर्वारा। किं चान्यतरत्वलान्तविशेषण-श्रौतस्मार्तकर्माधिकारित्वविशेष्ययोर्वैयधिकरण्यं च नालोचितं भवद्भिर्ब्राह्मणत्वनिर्वचनसंभ्रमेण। यत्तु न चेत्यादिशङ्कायां समाधानोपपादनं तद्भवादृशानामेव शोभते, न हि तज्जन्मनि कृतेन तपोविशेषेणैव ब्राह्मणत्वं जायते इति केनचिदुक्तम्, जन्मान्तरानुष्ठितेन तज्जन्मन्यनुष्ठितेन वा तपोविशेषेणेति हि अस्माभिरुच्यते। अतएव श्रुतिरप्याह, "रमणीयचरणा रमणीयां योनिमापद्यन्ते कपूयचरणाः कपूयां योनिमापद्यन्ते" इति। किं च शूद्रजातीयस्य फलान्तरार्थं ब्राह्मणाद्यधिकारक-तपोविशेषेऽधिकाराभावेऽपि ब्राह्मणत्वावाप्त्यर्थं तपोविशेषानुष्ठानं युज्यत एव ; अतएव वेदशास्त्रसम्पन्नोमतङ्गो मातृदोषेण स्वस्य चाण्डालत्वं जानन्नपि ब्राह्मणत्वावाप्त्यर्थं घोरं तपश्चचारेति भारतकथापि सङ्गच्छते ; तस्य तपसि यदि नाधिकारस्तदा जम्बुकस्येव श्रीरामः, इन्द्रस्तच्छिरोऽरुन्मुखानां यतीनामिव छिन्द्यादेव। किं च शटकोपस्यापि तपोविशेषं

तत्कालवर्त्तिभिः साक्षात्कृतं तदुपदेशविदः शिष्टा वदन्त्येव ; न च पुराणेतिहासादिषु न कुत्राप्युक्तमिति अस्मदभिप्राय इति वाच्यम्, पुराणपुरुषाणां वृत्तान्तस्यैव पुराणेष्वभिधानात् पुराणेष्वनभिहितस्यापि युष्माकमस्माकं च ब्राह्मणत्वस्योभयैरप्यङ्गीकारात्। यच्च योऽनधीत्येत्यादिना स्वस्थचित्तैर्विभाव्यतामित्यन्तेनोक्तं तन्न सत् तत्तन्मनुभारतवाक्यानां स्वकर्मत्यागानुष्ठानयोर्महादोषगुणप्राप्तावभिप्रायवर्णनं महदुपहास्यम्। शमदमादिरेव ब्राह्मणत्वं न तदतिरिक्तं किञ्चिद् ब्राह्मणत्वं वक्तुं शक्यमिति वदतां वाक्यानां तदनुष्ठाने ब्राह्मणत्वमन्यो वा कश्चिद्गुणो भवतीत्यभिप्रायः कथं ज्ञायेत ब्राह्मणव्यतिरिक्तानां मुमुक्षूणां शमदमादिधर्माचरणेन मोक्षप्राप्तिहेतुभूतं ब्राह्मणत्वं भविष्यतीत्येतत्कथमुपपद्यते, मोक्षस्याव्यवहितहेतुरुपासना न तु ब्राह्मणत्वम् अन्यथा प्रतर्दनविद्याप्रकरणे इन्द्रेण "त्वमेव वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यसे।" इति प्रतर्दनेनोक्तेन मामुपास्वेत्यादिना मोक्षफलकविद्योपदेशोऽनुचितः स्यात् प्रतर्दनस्य क्षत्रियत्वात् तस्य ब्राह्मणत्वावाप्तिहेतुधर्मस्यैवोपदेश्यत्वात्। किं च मधुविद्यादिषु देवानामधिकारानधिकारविचारवत् ब्राह्मणानां प्रतर्दनविद्यादिषु अधिकारानधिकारविचारोऽपि कर्त्तव्यः स्यात्, दमशमाद्यतिरिक्तं किञ्चिद् ब्राह्मणत्वमेव नास्तीति वदतां कथं शमदमादिकं जन्मान्तरीय-ब्राह्मणत्वसाधनमिति तात्पर्य्यं वर्णनीयम्। यावदायुषं विभावनायां सत्यामपि भवदुक्तार्थः कस्यचित् पदवाक्यप्रमाणज्ञस्य

न हृदयङ्गमो भवितुमर्हति। अतोदयेत्यादिवह्वाञ्जलीनामाकमित्यन्तमज्ञानविजृम्भणम्। न हि जन्मान्तरीय-तपोविशेषेण जन्मान्तरीय-ब्राह्मण्यमनुमाय तत्-शून्ये विद्यमानजन्मनि ब्राह्मणाधिकारकमाचार्य्यत्वं योजितमस्माभिः, किन्तु जन्मान्तरानुष्ठिततपोविशेषेण पञ्चाग्निविद्याप्रकरणोक्तश्रुतिवाक्यानुसारेणास्मिन् जन्मनि ब्राह्मणत्वं जायते ततस्तस्याचार्य्यत्वमस्मिन् जन्मनि सम्भवतीत्युक्तम्। वैदिकधर्मविद्वेषिणां वैदिकार्थोऽन्याय्यो भासत इत्यास्तिकैर्न स संत्याज्यः। अतएवातएवत्यादिकमप्यसदस्रम् तस्यापि वाक्यजातस्य जन्मान्तरानुष्ठिततपोविशेषेण तस्मिन् जन्मन्यवाप्तब्राह्मण्ये तच्छून्यजन्मन्याचार्य्यत्वमेभिर्योजितमिति भ्रान्तिमूलकत्वात्। किं च जन्मान्तरीयेत्यादिवुद्धेति पदमुपसंगृहीतवानित्यन्तमतितुच्छम् जन्मान्तरीययोग्यतया शूद्रजन्मन्याचार्य्यत्वस्यास्माभिरनुक्तत्वात्। किञ्च भवदुक्तरीत्येत्यादिकमपि महाभारतीय-पूर्वापरवचनानवलोकनकृतम्। विदुरः खलु ब्रह्मविद्योपदेशाधिकारसम्पन्नोऽपि "उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः" इति कृष्णोक्तरीत्या धृतराष्ट्रस्य ब्रह्मविद्यां नोपदिदेश। अस्यायमभिप्रायः, ब्रह्मविद्या हि शिष्याणामुत्कट-शुश्रूषामन्तरा नोपदेश्यानुजेन विधेयेन मयोपदिष्टापि नास्य हृदये प्रतिष्ठां प्राप्नुयात् अस्मदधिकारमजानन्तोऽन्येऽप्येवमुपदिशेयुः तदा तेषामनर्थः स्यात्, "यद्यदाचरति श्रेष्ठः" इति न्यायात् "अयं सनत्सुजातादिभ्यो ब्राह्मणेभ्यो ब्रह्मविद्यां शृणोतु" इत्यादिः ब्रह्मविद्यादौर्लभ्य-

मभिप्रेत्यैवोपदेक्ष्यामीति भगवदुक्तमपि सङ्गच्छते । अतएव तूष्णीं विदुरकलेवरं दग्धुकामं युधिष्ठिरं यतिधर्मप्राप्तोऽसावित्यशरीरवाणी ब्राह्मणेषूत्तमानां यतीनां कर्त्तव्यं संस्कारं विदुरशरीरस्य कारयितुमाह ब्राह्मणत्वस्याभावे कथं यतिधर्मावाप्तिः । अतो जन्मान्तरीयेत्यादिकमपि न समीचीनम् । अस्मदुक्तार्थमीश्वरः स्वातन्त्र्येण नाङ्गीकरोतु प्रमाणपरतन्त्रैः प्रामाणिकोऽर्थः सर्वोऽप्यङ्गीकर्तव्य एव, न ह्यत्रास्माभिः कुत्रचित् वितण्डा क्रियते सर्वत्र भवदुक्तदोषान्निवार्य्य स्वमतस्यैव स्थापितत्वात्, भवद्भिस्तु स्वमतेऽस्मदुक्तदोषनिराकरणपूर्वकं स्वमतस्थापनं विनैवोत्तरोत्तरं वाङ्मात्रेण दोष उद्भाव्यत इति कोऽत्र वितण्डावादीति विमृश्यताम् तत्तदधिकार्य्यनुगुणं सर्वशास्त्रसंप्रतिपन्नार्थमभिदधाना वयमेव चेद्धर्मविप्लावनार्थं बद्धपरिकरास्तर्हि के धर्मसंस्थापकाः ? किं चास्मदुदाहृतानामस्मदुक्तार्थे विपरीतेऽसम्भवतां भविष्यत्पुराणवचनानां भवदभिप्रायवैदेशिकानां का गतिरुक्ता भवद्भिरिति ।

प्रश्न० 'भवतामुपदेश्याश्चत्वारो वर्णास्त्रयोद्वावेको वेति ?

दुर्ज० तत्राष्टौ वाक्यान्येतत्प्रश्नविषयाणि । तत्र प्रधानप्रश्नस्येदमुत्तरम्, चत्वारो वर्णा यथायोग्यमुपदेश्या इति । परन्तूपदेशकर्मीभूतो मन्त्रस्त्रैवर्णिकाधिकारिभेदेन वैदिकतान्त्रिकभेदेन भिद्यते' इति ।

टी० एतत्प्रश्नविषयाणीति एतत्प्रश्नोत्तरवाक्यार्थज्ञानं साक्षात्परम्परया वाऽपेक्षमाणानीत्यर्थः । यथायोग्यं तत्त-

दधिकारानुगुणं तेषां मन्त्रवैलक्षण्यं ज्ञापयितुमाह, परन्त्वित्यादि ।

मञ्ज० "इति रामानुजीयाः ; अथ भवतामुपदेश्याश्चत्वारो वर्णास्त्रयो द्वावेको वेति प्रश्नस्य चत्वारो वर्णा यथायोग्यमुपदेश्यास्तत्र त्रैवर्णिकेषु वैदिकतान्त्रिकसाधारण्येनोपदेशः, त्रैवर्णिकातिरिक्तेषु तान्त्रिकमात्रस्यैव, वैदिकेषु तेषामधिकाराभावादिति परन्त्वित्यादि-वाक्यविन्यास-वैदग्ध्येनोत्तरं सूचितम् । तत्रोच्यते, भवदुक्तरीत्या शूद्रस्याचार्य्यत्वे स्थिते शूद्रकर्तृकोपदेशकर्मीभूता वैदिकास्तान्त्रिका अपि मन्त्रा अविशेषेण सम्भवन्त्येव । तत्र यदि स्वाननुष्ठितमेव शूद्रजातीय आचार्य्य उपदिशति तदा तस्य भवन्निरुक्ताचार्य्यत्वभङ्गः ; अनुष्ठितं चेदनुपदिष्टस्यानुष्ठानासम्भवेन भवदुक्तोत्तरमसङ्गतमिति विभाव्यताम् । न च तस्यापि ते मन्त्राः केनचिदुपदिष्टाः, अतोऽनुष्ठानासम्भवाभावेनास्मदुत्तरं नासङ्गतमिति वाच्यम्, तदुपदेष्टुस्त्रैवर्णिकत्वे शूद्रं प्रति वैदिकमन्त्रोपदेशकत्वे तस्यैव पातित्यापत्तेः । अत्रैवर्णिकत्वे तस्यैव भवदाद्याचार्य्यत्वापत्तौ भवदाचार्य्यपरम्परायां तस्यादावुल्लेखाभावेन शटकोपस्यैवोल्लेखेन च भवच्छिष्टानां भ्रान्तत्वापत्त्याऽशिष्टत्वापत्तेरित्यलम् इति तत्खण्डनम्" इति ।

व्या० तत्रोच्यत इत्यारभ्य तत्खण्डनमित्यन्तमस्मत्प्रतितन्त्रार्थाज्ञाननिबन्धनम्, अस्माभिः खल्वेवमुच्यते, शटकोपो जन्मान्तरानुष्ठित-सुकृतविशेषलब्ध-शमदमादिसकलात्मगुणो दुष्कृतआरब्ध-शेषभोगार्थमवाप्त-शूद्रयोनिजन्मा विलक्षणविशेषकटा-

चोद्बोधितो जाबालिवद्गर्भे एव सम्यक्स्मृतसकलवेदशास्त्रार्थः द्वात्रिंशद्वर्षपर्य्यन्तम् आहारनिद्रादिसकलसांसारिक-व्यवहार-पराङ्मुखः स्थित्वा प्रारब्धावसाने कलेवरं तत्याज। अनन्तरं च सार्धत्रिसहस्रवर्षपर्य्यन्तकालानन्तरं श्रीनाथमुनिः स्वपित्री-श्वरयोगिकृत-संस्कारस्तदवाप्तमन्त्रोऽपि तदर्थज्ञानार्थमर्चारूपं शटकोपमुपासितवान्। शटकोपोऽपि बहुकालं तेनोपासितः प्रसन्नो भूत्वा मुक्तावस्थायां तिरस्करिण्यन्तर्हितः तस्य मन्त्रार्थ-प्रभृति-सकलास्मत्सम्प्रदायार्थमुपदिदेश। नाथमुनिश्च स्वशिष्यस्य पुण्डरीकाक्षस्येति। न हि शटकोपस्तस्मिन् जन्मनि कस्यचिदुप-देशं श्रुत्वा तदर्थज्ञानवानभूत् इति च। न चैतादृश-प्रणाल्यां प्रमाणाभाव इति वाच्यम्, तस्य शूद्रजातीयत्वादौ अस्मद्वाक्यं प्रमाणतया स्वीकुर्वद्भिर्भवद्भिरन्यत्रापि तदीय-वृत्तान्तविशेषे तत्प्रामाण्याङ्गीकारस्यैव युक्तत्वात्। एवं च सति तदुपदेष्टुस्त्रै-वर्णिकत्वात्रैवर्णिकत्वादिविकल्प-तद्दूषणानामसङ्गतिरेवेति।

दुर्ज० "'तत्र प्रथमं वाक्यम्', एतदवलम्बिनां वाक्यानां मध्ये प्रथमं वाक्यम्।

प्रश्नः 'तत्र त्रयो वर्णा द्विजातयस्तेषां गर्भाधानादिसंस्कार-पूर्वकयज्ञोपवीतादिग्रहणं सावित्रीग्रहणं च मुख्यम्' इति।

तत्र ओमित्युत्तरम्। परन्तु गर्भाधानादिसंस्कारपूर्व-कत्वं यज्ञोपवीतादिग्रहणस्य यदभिहितं, तत्र गर्भाधाना-दीनां यज्ञोपवीतादिग्रहणाङ्गत्वं ज्ञायते। तच्च न सम्भवति। तादृशसंस्काराणां यज्ञोपवीतादिग्रहणं प्रत्यारादुपकारकत्वेन

सन्निपत्योपकारकत्वेन चाङ्गत्वासम्भवात्। तद्धि स्वरूपनिर्वर्त्तकानां प्रोक्षणव्रीह्यवघातपेषणप्रोडाशादीनां फलांश उपकारकाणां प्रयाजाऽनुयाजादीनां च सम्भवति, नैवं प्रकृते; यदि कालविशेषमात्रपरत्वं तदा ओमिति ब्रूमः" इति।

टी॰ 'तत्र' भवदुपदेश्यतयाऽभिहितेषु। 'त्रयो वर्णाः' ब्राह्मण-क्षत्रिय-वैश्याः। ओमित्यङ्गीकारे यत्तत्र विरुद्धमिव भासते तदाह,—परन्त्वित्यादिना। तादृशसंस्काराणां गर्भाधानादिसंस्काराणां यज्ञोपवीतादिग्रहणाङ्गत्वं ज्ञायत इति प्रायशो नियतपूर्वापरभावापन्नयोरङ्गाङ्गिभावादिति भावः। 'आरादुपकारकत्वम्' अदृष्टद्वारोपकारकत्वम्। 'सन्निपत्योपकारकत्वं' च दृष्टद्वारा उपकारकत्वम्। स्वरूपनिर्वर्त्तकानामिति व्रीह्यादीनां हि उत्तरोत्तरपिष्टपुरोडाशादिद्वारा यागस्वरूपनिर्वर्त्तकत्वं प्रोक्षणस्यादृष्टजनकत्वेऽपि दृष्टविधयोपकारकस्य व्रीहेः संस्कारकत्वान्नासङ्गतिः। फलांशे उपकारकाणामिति सन्निपत्योपकारकैर्निर्वर्त्तितेन यागेन फलादृष्टे जननीयेऽङ्गादृष्टद्वारोपकारकाणामित्यर्थः।

सम्म॰ "इति रामानुजीयाः, तत्र त्रयो वर्णा द्विजातयः। तेषां गर्भाधानादिसंस्कारपूर्वकयज्ञोपवीतादिग्रहणं सावित्रीग्रहणं च मुख्यमित्यस्मत्प्रश्नवाक्यस्य प्रधानप्रश्नवाक्यावलम्बिवाक्यानां प्राथम्यमात्रप्रतिपादनार्थं सम्प्रति प्रथमवाक्यमित्येतत्पदस्य द्विरुपादानं लेखकप्रमादादागतमलङ्कारार्थं वेति विमर्शं प्रकृताऽनुपयोगित्वादकृत्वैवोमित्युत्तरस्य प्रत्युत्तरमुद्भाव्यते। तत्र यदितेषां

तदनुष्ठानमावश्यकत्वं, तदा तत्प्रत्यवकारणीभूतो भवत्सम्प्रदायो नादेय इति। अर्थान्तरप्रश्नाश्रयं शास्त्रैवोत्तरमुक्तं चेत् भवतां श्रीमतां धर्मज्ञानां योग्यमेव, एतदङ्गीकृतं चास्माभिरपि। यदुक्तं गर्भाधानादिसंस्काराणां यज्ञोपवीतादिग्रहणादीनां च संस्कारपूर्वकयज्ञोपवीतेत्यादिपदविन्यास-संसूचिताङ्गाङ्गिभावो गर्भाधानादेरारादुपकारकत्वसन्निपत्योपकारकत्वरूपाङ्गत्वाभावेन न युज्यत इति। तत्रोच्यते कृतगर्भाधानादिसंस्कारकस्यैवाष्टवर्षाद्युपलक्षितस्योपनयनाध्यापनादिविधिभाव्यभावनाय, "अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत" इत्यादिलिङ्गश्रुत्यावगमात्, च्युतसंस्कारकस्य ब्राह्मणत्वच्युतेर्बहुशः श्रुतत्वेन चोपनयनकर्मणि गर्भाधानादिसंस्कारसंस्कृतस्यैवाधिकारेण गर्भाधानादीनां च प्रयाजानुयाजादिवदात्मसमवेतापूर्वजनकतयाऽरादुपकारकत्वरूपाङ्गत्वम्। आरादुपकारकत्वरूपाङ्गत्वस्यानुगतनिर्वचनमन्तरेणापलपितुमशक्यमेवेति कालविशेषपरत्वे भवतां तोष इति तत्खण्डनम्" इति।

व्या० तत्र यदीत्यादि अङ्गीकृतं चास्माभिरित्यन्तमित्यतिसाहसकृतम्। गर्भाधानादियज्ञोपवीतादिसंस्काराणामावश्यकत्वाङ्गीकारेऽस्मत्सम्प्रदायस्य कथं तत्प्रत्यवकारणत्वं? किं विरोधात् संस्कारसम्प्रदाययोः? उत मणिमन्त्रादिन्यायेन? न प्रथमः, तमेवं वेदानुवचनेन "ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन विद्यां चाविद्यां च यस्तद्वेदोभयं स अविद्यया मृत्युं तीर्त्वा विद्यया मृतमश्नुते।"

"इयाज सोऽपि सुबहून् यज्ञान् ज्ञानव्यपाश्रयः ।
ब्रह्मविद्यामधिष्ठाय तर्तुं मृत्युमविद्यया ॥"

"सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्——"

इत्यादिश्रुति-तदुपबृंहणस्वरसतार्थं विचार्य्य कर्मज्ञानपरिकर्मित-स्वान्तस्य भक्तियोगनिष्पत्तिमङ्गीकुर्वाणानामस्माकं सम्प्रदाय-स्यावश्यं तदनुष्ठानप्रयोजकत्वात्। नापि द्वितीयः, 'अस्मत्सम्प्र-दायिषु नियमेन तदनुष्ठानदर्शनात्। इत्यर्थाल्लब्धप्रश्नाश्रयं ज्ञात्वे-त्यादि, भवदुक्तार्थस्य शशविषाणायमानतया तत्रार्थे आश्रय-ज्ञानं कस्यचित् कथं भवितुमर्हति। एवं च श्रीमतामित्या-दिना कथमयमुपालम्भः। यदुक्तमित्यादिकमतितुच्छम्, कृत-गर्भाधानादिसंस्कारकस्यैवोपनयनादिविधानेऽपि गर्भाधाना-दीनामङ्गत्वे उपनयनादिकं प्रति न किञ्चित् प्रमाणमुपलभ्यते। पूर्वापरभावमात्रेणाङ्गत्वे जीवत एवोपनयनसम्भवाज्जीवनस्यापि तदङ्गत्वापत्तिः। किं चाङ्गत्वं नाम यदुद्देशप्रवृत्तकृतिकारकत्वेन विहितं यत्, तत्त्वं तदङ्गत्वं स्वर्गोद्देशप्रवृत्तपुरुषकृतौ यागानु-कूलायां च कारकत्वेन विध्यन्वयाद् यागस्य स्वर्गं प्रत्यङ्गत्वम्। एवं दर्शपूर्णमासादिप्रधानोद्देशप्रवृत्तपुरुषकृतौ प्रयाजाद्यनु-कूलायां कारकत्वेन विध्यन्वयात् प्रयाजादेः प्रधानाङ्गत्वम्। प्रकृते उपनयनाद्युद्देशप्रवृत्तपुरुषकृतौ गर्भाधानादिस्वतन्त्र-संस्कारानुकूलायां गर्भाधानादेः कारकत्वेन विध्यन्वयाभावात् कथं तदङ्गत्वम्। किं चाङ्गत्वबोधकप्रमाणेषु श्रुतिलिङ्गवाक्य-प्रकरणस्थानसमाख्यारूपेषु षट्सु किमत्र प्रमाणमिति विवेच-

णीयम्। लिङ्गश्रुत्येति तदुक्तमिति चेत्, दुरुक्तं तु तत्, लिङ्गश्रुत्येत्यस्य कोऽर्थः? लिङ्गविशिष्टश्रुत्येति वा? लिङ्गकल्पितश्रुत्येति वा? तत्र श्रुतिर्नामाङ्गत्वघटकीभूतोद्देश्यताकृतिकारकत्वयोरन्यतरस्य प्राधान्येन वाचकः शब्दः। स च द्वितीयादिविभक्तिरूपः। एवं लिङ्गं नामाङ्गत्वघटकीभूतपरोद्देश्यताकृतिकारकत्ववाचकपदकल्पनानुकूला योग्यता, यथा स्रुवेणावद्यतीत्यत्र स्रुवनिष्ठा द्रव्यपदकल्पनानुकूला। एवं च प्रकृते गर्भाधानादीनामङ्गत्वबोधिका कापि श्रुतिर्नास्ति, नापि लिङ्गं किञ्चित् दृश्यते इति, लिङ्गविशिष्टा तत्कल्पिता वा श्रुतिः। यथा 'बर्हिर्देवसदनं दामि' इति मन्त्रे स्वछत्तिकारकत्ववाचितृतीयापदकल्पनानुकूला योग्यता हि वर्त्तते, तथा च श्रुतिः कल्प्यते। वाक्यादिप्रमाणान्यपि नोपलभ्यते इति कथमङ्गत्वम्? उपनयनादिसंस्कारस्य गर्भाधानादिसंस्कारान् विनाऽसम्भवमात्रेण तदङ्गत्वं न सम्भवति। एवं सति सन्ध्यावन्दनं विना कुत्रापि श्रौतस्मार्तकर्मानुष्ठानासम्भवेन तस्य सर्वश्रौतस्मार्तकर्माङ्गत्वं स्यात्, तत्प्रयुक्तिश्च स्यात् कपालादेः पुरोडाशादिप्रयुक्तिवत्। स्वसमवेतादृष्टजनकत्वमात्रेणारादुपकारकत्वाभिधानं च भवतामेवोचितं भवति, भवतां नवीनमीमांसादर्शनस्थापनसामर्थ्यात्, कालविशेषपरत्वे विरोधाभावादस्माकं तोषो युज्यत एव, तत्खण्डनमिति महतीयं कृत्वा स्वविनाशहेतुरुत्थापिता।

दुर्ज० "प्रश्न० 'तद्वते द्विजातित्वाभावात् व्रात्यत्वं यथा तथा भवदुपदेशाभावेऽपि किं तथात्वे भवदुपदेशाभावात् व्रात्यत्वं

स्नानदानादिकं वृथा स्यात्? तत्र शास्त्रसम्मतं विद्वत्सम्मतं च, नो चेत्? कुतो विशेषाग्रहः?' इति। द्वितीयं वाक्यं, तत्रेदमुत्तरमवधेयम्। गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म-नामकरणान्नप्राशन-चौलोपनयनादीनां स्वस्वकालेऽनुष्ठाने कालातिक्रमणे आषोड़शाब्दतः प्रायश्चित्तपूर्वकमनुष्ठाने त्रैवर्णिकानां तत्पूर्वकं सावित्रीग्रहणे च व्रात्यत्वं नास्ति; तदभावे तु व्रात्यत्वमिति यथा सामान्यशास्त्रमभिदधाति; तथा वैष्णवधर्मैदम्पर्य्येण प्रवृत्तं शास्त्रं व्रात्यत्वं नाभिदधाति। अस्मदीयपूर्वाचार्य्यनियमितक्रमेण शास्त्रसम्मतेनोपदेशाभावे परन्तु वैष्णवविशेषत्वं नास्तीति ब्रूते। किं तद्वैष्णवविशेषत्वमिति चेत्? शृणु, वैष्णवत्वं न जातिर्नोपाधिर्वा, किन्तु विष्णुप्रीतिविशेषविषयत्वम्। सा च प्रीतिः पञ्चरात्रादिवैष्णवधर्मासाधारणप्रवर्त्तकशास्त्रोक्तसंस्कारविशेष-तत्पूर्वकाचार्य्यविशेषोपदेशविशेषजन्यज्ञान-तदर्थानुष्ठानजन्या। यदि तादृशप्रीतिं प्रति परम्परया कारणीभूतसंस्कारविशेषपूर्वकास्मदीयाचार्य्यपरम्परा-प्राप्तमन्त्रविशेषोपदेशाद्यभावस्तदा न तस्याः सम्भव इत्यवैष्णवत्वम्। एतच्चावैष्णवत्वं गायत्रीविधुराणां वैदिका व्रात्यत्वमिव वैष्णवा वयं त्याज्यतावच्छेदकं मन्यामहे। त्याज्यत्वं चास्मद्गोष्ठ्यनारोह एव तत्समीपे ह्यस्मत्पूर्वाचार्य्य-परम्परा-प्राप्तार्थविशेषविचारादिकं न कुर्महे। यथा वैदिका व्रात्यसमीपे वेदाध्ययन-तदर्थविचारादिकं न कुर्वन्ति। यदि व्रात्यत्वमित्यनेन तादृशावैष्णवत्वमभिप्रेतं तदा ओमिति ब्रूमः। स्नानदानादिकं वृथा

स्यादिति यदुक्तं तत्सत्यमेव। वृथेत्यनेन नैष्फल्यमुच्यते। निष्फलत्वं च न हि फलसामान्याभावोऽपि तु तद्विशेषाभावः। पूर्वोक्तसंस्कारविशेष-तदधीनज्ञानानुष्ठानवतानुष्ठितं स्नानदानादिकं हि भगवत्प्रीतिविशेषात्मकफलविशेषजनकतया वैष्णवशास्त्रेषु प्रतिपाद्यते। तादृशसंस्कारादिशून्येनानुष्ठितं न तादृशफलविशेषोत्पादनायालम्। अतो युक्तमेव निष्फलत्वं यथा बहुतरद्रव्यव्ययायाससाध्यं ज्योतिष्टोमादिकमनुसंहितफलेन मुमुक्षुणाऽनुष्ठितम्,—

"इयाजसोऽपि सुबहून् यज्ञान् ज्ञानव्यपाश्रयः।
ब्रह्मविद्यामधिष्ठाय तर्त्तुं मृत्युमविद्यया॥"

इत्यादिप्रमाण-प्रतिपन्नब्रह्मज्ञानपूर्वकमोक्षाख्यफलं प्रति कारणं भवति, तदेव त्रिवर्गनिष्ठेनानुष्ठितं स्वर्गपश्वाद्यामुष्मिकैहिकफलं जनयति, तच्च पूर्वोक्तकर्मापेक्षया निष्फलमित्येवाभिधीयते। न हि किञ्चिदपि कर्मफलसामान्याभाववद्भवतीत्येतदुक्तमवैष्णवत्वापरपर्य्यायं व्रात्यत्वं न शास्त्रासम्मतम्। वैष्णवशास्त्रेषु पञ्चरात्रादिषु तथा प्रतिपादनात्। अतएव विद्वत्सम्मतं च, न हि कश्चन प्रतितन्त्रार्थः सर्वविद्वत्सम्मतो भवति। अतएव विशेषाग्रहश्च युक्त" इति।

टी॰ तद्दते इति उपनयनगायत्रीशून्यस्येत्यर्थः। च्युतेशब्दस्य विनाशशब्दवदत्यन्ताभावार्थकत्वस्याप्यङ्गीकारादिति भावः। द्विजातित्वाभावादिति, आषोडशाब्दादित्यादिमनुवचनादिप्रमाणप्रतिपन्नं व्रात्यत्वमिह दृष्टान्तविधयोक्तम्। भवदुपदेशाभावेऽपि

किं तथात्वे इति भवदुपदेशस्य द्विजत्वप्रयोजकतया भवद्भिरङ्गीकारात् तदभावे द्विजत्वं भवद्भिर्नाङ्गीक्रियत इत्यभिमानः । तथात्वे द्विजत्वाभावे भवदुपदेशाभावात् व्रात्यत्वमिति द्विजत्वप्रयोजकस्य भवदुपदेशस्याभावे व्रात्यत्वमित्यर्थः । स्नानादिकमिति व्रात्यैरनुष्ठितश्रौतस्मार्तकर्मणां यथा फलजनकत्वाभावस्तथा भवदुपदेशाभावनिबन्धन-व्रात्यत्वैरनुष्ठितानां स्नानदानादीनां कर्मणां निष्फलत्वं भवद्भिः स्वीकार्य्यमिति भावः । तत्र शास्त्रसम्मतमिति शास्त्रैर्गर्भाधानाद्युपनयनपर्य्यन्तसंस्कारविशेषसंस्कृतस्य द्विजत्वाभिधानात् भवदुपदेशाभावे द्विजत्वाभावो व्रात्यत्वं च कुत्रापि नोक्तमिति भावः । विद्वत्सम्मतं चेति शास्त्रसिद्धं स्वयं विद्वांसोऽभ्युपगच्छन्तीति भावः । नो चेदिति भवदुपदेशाभावेऽपि द्विजत्वाभावो व्रात्यत्वं च न स्वीक्रियते चेदित्यर्थः । विशेषाग्रह इति कुत्रचित् सम्प्रदाय आग्रह इत्यर्थः । प्रथमं तादृशाभिमानं निराकरोति, गर्भाधानादीत्यादिना व्रात्यत्वं नाभिदधातीति द्विजत्वाभावस्याप्युपलक्षणम् । वैष्णवत्वं न जातिरिति आगन्तुकतयाऽयावद्द्रव्यभावित्वादिति भावः । संस्कारविशेषः पञ्चसंस्कार आचार्य्यविशेषोऽस्मत्सम्प्रदायार्थोपदेशक्षमः उपदेशविशेषः तादृशाचार्य्यकृतरहस्यत्रयतदर्थोपदेशः इत्यवैष्णवत्वम् उक्तरीत्याऽवैष्णवत्वम् । एतादृशावैष्णवत्वमेव प्रश्नवाक्यस्थेन व्रात्यत्वमित्यनेन विवक्षितं तदाऽङ्गीकार एवास्माकमित्याह,—यदीत्यादिना । स्नानदानादिकं वृथा स्यादिति यदुक्तम्, तत्र फलविशेषजनकत्वाभावरूपं निष्फलत्वमिष्टमि-

त्वाह,—स्नानदानादिकं वृथा स्यादिति यदुक्तमित्यादिना। ननु फलजनकस्य कथं निष्फलत्वमिति शङ्कां दृष्टान्तोपन्यास-पूर्वकं निराकरोति यथा बहुतरेत्यादिना। ननु तादृश-व्रात्य-त्वस्य भवत्सम्मतत्वेऽपि न सर्वविद्वत्सम्मतत्वमित्यत आह,—न हि कश्चनेति। विशेषाग्रहः अस्माकमस्मत्पूर्वाचार्य्योपदेशपरम्परा-प्राप्ते सम्प्रदायविशेषे आग्रहः अवश्यानुष्ठेयत्वनिश्चयः।

सत्य० इति रामानुजीयाः, तद्वते द्विजातित्वाभावात् व्रात्यत्वं यथा भवदुपदेशाभावेऽपि किं तथात्वे भवदुपदेशा-भावात् व्रात्यत्वं स्नानदानादिकं वृथा स्यात्, तन्न शास्त्रसम्मतं विद्वत्सम्मतं च। नो चेत्? कुतो विशेषाग्रह इत्यस्मत्प्रश्नस्य, तथा यज्ञोपवीत-साविश्याद्यग्रहणे व्रात्यत्वाभिधो महान् दोषः शास्त्रेऽभिहितस्तथा भवत्सम्प्रदायाग्रहणे भवत्सम्प्रदायिभिरुद्दिष्ट-स्तादृशो दोषो भवतामपि शास्त्रोक्तत्वेन सम्मतो यदि तदा तदग्रहणवतां बहूनां सतां स आपद्येत, नो चेत् भवत्सम्प्रदायिनां तादृशो दुराग्रहः कुत इति आशयः। तत्रास्मत्सम्प्रदाया-ग्रहणवतामस्मदङ्गोद्धनारोहमात्रं व्रात्यत्वं विष्णुप्रीतिविशेषविष-यत्वाभावरूप-वैष्णवत्वाभावेन भवति तादृश-विष्णुप्रीतिविशेष-रूपफलाभावेन निष्फलत्वम् अस्मत्सम्प्रदायस्य-विद्वत्सम्मतम् अ-स्मत्सम्प्रदायस्यास्मत्सम्प्रदायि-विद्वद्विशेषैराग्रहोऽपि कर्त्तुं युक्त इत्यभिप्रायविस्तरेणोत्तरमुक्तम्। तत्रोच्यते, भवत्सम्प्रदायस्य विष्णुप्रीतिविशेषविषयत्वरूपवैष्णवत्वं प्रति कारणत्वं न वा? नाद्यो भवत्सम्प्रदायस्य शठकोपप्रवर्त्तिततया स्वल्पकालावधि-प्रचलित-

तस्य भवद्गुरुनिर्मित-दिव्यसूरिचरितादाववगतत्वेन भवत्पूर्वेषां तादृशसम्प्रदायग्रहणाभावेन तादृशवैष्णवत्वाभावप्रयोज्य-व्रात्यत्वापत्त्या भवतां सर्वेषां सम्प्रदायिनां व्रात्यत्वापत्तेः। किं च भवत्सम्प्रदायशून्यानां चाण्डालत्वस्य

"अवैष्णवस्तु यो विप्रश्चण्डालादधमः स्मृतः।
न तेन सह भोक्तव्यम् आपद्यपि कदाचन॥"

इति भवत्कल्पितवचनेन प्रतिपादितत्वेन भवत्पूर्वेषां चाण्डालत्वापत्त्या भवत्सम्प्रदायिनां सर्वेषां चाण्डालत्वापत्तेश्च। नाद्यः, यज्ञोपवीत-सावित्र्याद्यग्रहण-प्रयोज्य-व्रात्यत्वाभिधानवद्भवत्सम्प्रदायाग्रहणप्रयोज्य-व्रात्यत्वस्य कथमपि सम्भवाभावेन तदभिधायकानां भवतामुन्मत्तत्वापत्तेः। तस्मादस्मत्प्रश्नस्तदवस्थ एवेत्यलम्। एतेन स्नानदानादिकं वृथा स्यादिति यदुक्तं तत्सत्यमेवेत्यारभ्यातो युक्तमेव निष्फलत्वमित्यन्तं यदुक्तं तदप्यपास्तम्। भवत्पूर्वेषां स्नानदानादिवैयर्थ्यापत्तौ केवलानर्थफलजनकेन भवत्सम्प्रदायेन भवत्स्नानदानादिसार्थक्यस्य कथमपि वक्तुमशक्यत्वात्। यद्वा तादृशविष्णुप्रीतिविशेषान् यादृश-तत्प्रीतिविशेषविषयवैष्णवानां शिव-सूर्य्य-गणपत्यादिप्रीतिविशेषविषय-शैवसौरगाणपत्यानां च गोष्ठ्यनारोहस्तादृशविष्णुप्रीतिविशेषविषयत्वरूप-वैष्णवत्वाभावेन शैवत्वाद्यभावेन च तत्तत्प्रीतिविशेषरूपफलाभावेन च निष्फलत्वं तत्तत्प्रीतिविशेषजनकसम्प्रदायस्य-विरुद्धसम्मतत्वं भवत्सम्प्रदायिनां तुल्यन्यायेन पुनरापद्येतैव। तत्र भवतामिष्टापत्तौ यत्र कुत्र शैवशिरोमणिगोष्ठ्यां

तादृशवैष्णवगोष्ठ्यां या स्थिता ये भवत्सम्प्रदायिनस्ते वहिर्गच्छन्तु सहासन-भाषणादिभिर्मन्त्तान् दूषयन्त्विति प्रत्युत्तरमस्माकमित्येवावयवन्तु इति तत्खण्डनम् इति।

व्या० इत्यस्मत्प्रश्नेत्यादिनेत्याशय इत्यन्तेन य आशय उत्प्रेक्षितस्तदनुगुणमेवास्माभिरुत्तरमभिहितम्। भवद्भिस्तु सम्यक् नावधारितम्। तत्रास्मत्सम्प्रदायाग्रहणवतामस्मद्गोष्ठ्यनारोहमात्रं व्रात्यत्वं विष्णुप्रीतिविशेषविषयत्वाभावरूपवैष्णवत्वाभावेनेत्यादिकमस्मदुक्तार्थाज्ञाननिबन्धनम्। तादृशावैष्णवत्वमस्मत्त्याज्यतावच्छेदकं त्यागश्चास्मद्गोष्ठ्यनारोह इति सुस्पष्टमुक्तं तदन्यथैव भवद्भिर्ज्ञानम्। एवम् अवैष्णवत्वं विष्णुप्रीतिविशेषविषयत्वरूपवैष्णवविशेषत्वाभावः। स एव व्रात्यत्वं चेत् तदङ्गीकृतमिति चास्माभिरुक्तम्। तत्रोच्यते इत्यादिकमपि महतामुपपादनम्। अस्मत्सम्प्रदायस्य मदुक्त-वैष्णवत्वं प्रति कारणत्वं विकल्पितम्। कारणपक्ष इदं दूषणं भवद्भिरुक्तं भवत्सम्प्रदायस्य शठकोपप्रवर्तिततयेत्यादि शठकोपप्रवर्तितत्वं स्वल्पकालात् प्रवर्तितत्वं च नास्तीत्यसकृदुक्तमपि विस्मृतं भवद्भिः, तथापि प्रकृते को दोषः? किं सम्प्रदायस्य शठकोपप्रवर्तितत्वं स्वल्पकालात् प्रवर्तितत्वं च तादृशवैष्णवत्वकारणत्वविरोधि क्वचित् दृष्टम्। अस्मत्पूर्वेषां तादृशसम्प्रदायग्रहणाभावे तादृशवैष्णवत्वाभाव इष्ट एव वैष्णवत्वाभावप्रयोज्य-व्रात्यत्वापत्त्येत्यज्ञानादुक्तं भवद्भिः। भवतां सर्वेषां व्रात्यत्वापत्त्येति वदद्भिस्तर्ककुशलताऽऽविष्कृता पूर्वेषां वैष्णवत्वाभावेऽपि पश्चात्तनानामपि एतत्सम्प्र-

दायावलम्बिनां वैष्णवत्वोत्पत्तेरुक्ततया आपाद्यापादकयोर्व्याप्त्यभावात्। अतः विशेषव्याप्तेरभावात् सामान्यमुखी व्याप्तिर्वक्तव्या सा चेत्थं यद्धर्मविशिष्टपूर्वपुरुषको यः स तद्धर्मवानिति। तत्रा-यत्वदारिद्र्यपाण्डित्यमूर्खत्वादिविशिष्ट-पूर्वपुरुषकस्यापि दारिद्र्याद्यत्वमूर्खत्वपाण्डित्यधर्मदर्शनात् अवैष्णवत्वं च न मनुष्यत्वादिवत् यावद्द्रव्यभावी धर्मः। अवैष्णवपुरुषप्रसूतानामपि मदुक्तरीत्या सम्प्रदायविशेषावलम्बने वैष्णवत्वस्योक्तरूपस्योत्पत्तिस्वीकारे विरोधाभावात्। किं च भवद्वृद्धनिर्मितेत्यादिकमसत्, भवतां तत्तात्पर्य्यानवगतेः। किं चेत्यादिकमपि न सत्, भवत्कल्पितवचनेनेति न हि निन्दान्यायेन वैष्णवं स्तोतुं प्रवृत्तस्य वचनजातस्य वैष्णवकल्पितत्वकल्पने शैवमाहात्म्यप्रतिपादकवचनजातस्य शैवकल्पितत्वम् एव तत्तदुत्कर्षप्रतिपादकवचनानामपि तत्तत्कल्पितत्वसम्भावनायाम् एवं श्रुतिभारतादेरपि तत्तत्कल्पितत्वसम्भावनायां लोकायतानामेव जयः स्यात्। किं च तस्य वचनस्य कल्पितत्वकल्पनेऽपि भागवतीयस्य—

"विप्राद् द्विषड्गुणयुतादरविन्दनाभ-
पादारविन्द-विमुखात् श्वपचं वरिष्ठम्।
मन्ये तदर्पितमनोवचने हितार्थ-
प्राणं पुनाति सकुलं न तु भूरिमानः॥"

इति वचनस्य भवत्पूर्वपुरुषपठितभागवतकोशेषु दृश्यमानस्य का गतिः? किं च "अवैष्णवस्तु यो विप्रः" इति वचनं च नावैष्णवस्य विप्रस्य चाण्डालत्वं वदति। शूद्रो ब्राह्मणादधम इत्युक्तौ

ब्राह्मणत्वं शूद्रस्योक्तं, किन्तु तदपेक्षयाऽपकर्ष एव। एवं च प्रकृते चण्डालादपकर्षः तेनोक्तो भवति, यथा चाण्डालः सहभोजनाद्यनर्हो ब्राह्मणस्य तथाऽयमपि वैष्णवस्य सह-भोजनाद्यनर्ह इति तमर्थमुत्तरवाक्येन तद्वचनमेवाह,—'न तेन सह भोक्तव्यम्' इति। एतत्तत्त्वमग्रे स्फुटी भविष्यति। किं च तादृशचण्डालादधमत्वप्रयोजकमवैष्णवत्वं स्वाधिकरण एव तत्प्रयोजयतीति कथं स्वानधिकरणेष्वस्मासु दृढतरं स्वीकृत-वैष्णवसम्प्रदायविशेषेषु तत्प्रयोजयेत्। नान्य इत्यादिनोक्तं द्वितीयपक्षदूषणमपि न समीचीनम्। तादृशवैष्णवत्वस्य सम्प्र-दायग्रहणजन्यत्वाङ्गीकारादेव उन्मत्तैः खलु सर्वमुन्मत्तं दृश्यते, यथा पित्तदोष-दुष्टनयनेन सर्वं पीतं दृश्यते। अस्मत्सम्प्रद-यस्य एवेति को दोषस्तिष्ठतु दग्धः पटः यत् तु एतेनेत्यादिना यदुक्तं तदप्यपास्तमित्यन्तेनास्मदुक्तार्थेऽपास्तत्वं प्रतिज्ञाय भव-त्पूर्वेषामित्यादिना तदुपपादनं कृतं, तत्तुच्छम्। न हि केन-चिदनुष्ठितं यत्किञ्चिद्वैगुण्येन निष्फलं जातमिति तत्पुत्रपौत्रा-दिभिरनुष्ठितमपि सकलषाड्गुण्यवद् व्यर्थमेव भवेदित्यस्ति नियमः। किं च न हि व्यर्थमपि कर्म सर्वमनर्थमेव जनयति भवतां कर्मेव इव क्षुद्रफलजनकतया सार्थक्याभावेऽपि विष्णु-प्रीतिविशेषरूपफलविशेषजनकतया सार्थक्यसम्भवात्। यद्वेत्या-दिकमपि नास्माकं दोषावहं, तच्चेष्टापत्तिसम्भवात्।

प्रश्न० किं च यथा वर्णाश्रमधर्मवर्णनं सर्वग्रन्थेषु तत्फल-वर्णनं च तथा भवत्सम्प्रदायवर्णनं च कुतो नेति ?

दुर्ल० इति तृतीयं वाक्यम्। तत्रेदमुत्तरम्। न हि वर्णाश्रमप्रथमवर्णनं सर्वग्रन्थे आदिकाव्यभूते श्रीरामायणे सर्वशास्त्रप्रधानभूतायां ब्रह्ममीमांसायाञ्च तदृदर्शनात्। एवं कर्ममीमांसायामपि न वर्णाश्रमधर्मा निरूपिताः स्मृतिषु सामान्यधर्मैदम्पर्य्येण प्रवृत्तेसु पुराणादिषु च तत्प्रतिपादनमस्तीति चेदुच्यते, तदाऽस्मत्सम्प्रदायस्यापि वैष्णवधर्मैदम्पर्य्येण प्रवृत्तासु सनकादिस्मृतिषु पद्मपुराणादिषु पाञ्चरात्रशास्त्रे च प्रतिपादनमस्तीति सन्तोष्टव्यं भवताम्। किं च मनुस्मृतौ

"सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः
अप एव ससर्जादौ तासु वीजमपासृजत्॥"

इत्यनेन श्लोकेनास्मत्प्रतितन्त्रार्थ एवाभिहितः। अत्र मुक्तावली, अभिध्यानपूर्विकां सृष्टिं वदतो मनोः प्रकृतिरेवाचेतनाऽस्वतन्त्रा परिणमत इति पक्षो न सम्मतः, किन्तु ब्रह्मैवाव्याकृतात्मना जगत्कारणमिति त्रिदण्डिवेदान्तसिद्धान्त एवाभिमत इति प्रतिभातीति। अतः सर्वग्रन्थेष्वस्मत्सम्प्रदायाप्रतिपादनाभिधानं किञ्चिद्ग्रन्थमात्रावलोकिनां बहुतरग्रन्थानवलोकनप्रयुक्तमिति नात्र कश्चिदपराध्यतीति।

टी० सर्वग्रन्थेष्विति वेदोपबृंहणार्थं प्रवृत्तेषु सर्वग्रन्थेष्वित्यर्थः। तत्फलवर्णनं वर्णाश्रमधर्मफलवर्णनम्। अव्याकृतात्मनेति नामरूपविभागानर्हसूक्ष्मचिदचिच्छरीरकमित्यर्थः। कतिचिदित्यादि अस्मत्सम्प्रदायाप्रतिपादकानि सामान्यधर्मप्रतिपादनपरस्मृति-तामसपुराणानि च दृष्ट्वा तावन्मात्रसन्तुष्टा भवन्तोऽस्म-

त्सम्प्रदायार्थप्रतिपादक-वशिष्ठसनकादिस्मृतिपद्मपराशरपुराणादि-
पुराणानि चापश्यन्त एवैवमभिदधतीति भावः।

सर्व्व० इति रामानुजीयाः; अथ यत्र यथा वर्णाश्रम-धर्मवर्णनं सर्वग्रन्थेषु तत्फलवर्णनं च तथा भवत्सम्प्रदायवर्णनं कुतो नेत्यस्मत्प्रश्नस्य सर्वग्रन्थपदस्य यावद्ग्रन्थपरत्वे रामायणादिषु वर्णाश्रमधर्माप्रतिपादनरूप-प्रतिबन्धकसद्भाव्य-वर्णाश्रम-धर्मप्रतिपादकतया प्रवर्तितयत्किञ्चिद्विषयकत्वकल्पनया सनकादिस्मृतिषु पद्मपुराणादिषु पञ्चरात्रे च शास्त्रे सम्प्रदाय-वर्णनदर्शनेन सर्वत्र तद्वर्णनं कुतो नेति प्रश्नोऽज्ञानमूल इत्युत्तरदानेन सन्तोषोऽप्यतिदयालुतया दत्तः। तत्रोच्यते सन्तुष्टा वयं परं च तादृशसनकादिस्मृतीनामनुपलभ्यमानत्वादुपलब्धानां कतिपयानां सर्वत्रोपलम्भाभावेन भवत्कल्पितत्वेन सम्भाव्यमान-तयाऽप्रामाणिकत्वात् भारतीय-पञ्चरात्रागमस्य लुप्यमानताया वसुसंज्ञकं राजानमुपक्रम्य,

"स च राजश्रिया युक्तो भविष्यति महायशाः।
संस्थिते तु नृपे तस्मिन् शास्त्रमेतत् सनातनम्॥
अन्तर्द्धास्यति तत्सर्वम् एतद् वः कथितं मया।"

इति वचनेन भारत एव बोधनात् उपलभ्यमानस्य चेदानी कुण्डगोलकाद्यर्थतायाः,

"सात्वतो नाम परमो विष्णुभक्तः प्रतापवान्।
महात्मा दाननिरतो धनुर्वेदविदां वरः॥
स नारदस्य वचनाद् वासुदेवार्चने रतः।

शास्त्रं प्रवर्त्तयामास कुण्डगोलादिभिः श्रितम् ॥"

इति कौर्मवचसोऽवगतत्वात् । अतएव पञ्चरात्रागमस्य द्वितीतीयत्वमप्यवगतं भवतीति बोध्यम् । भारतीय-पञ्चरात्रागमे शंखचक्रादिविधानाभावेन तस्मात् कुण्डगोलाद्युचितं धर्मं सर्वत्र प्रवर्त्तयितुकामेषु प्रश्नस्तदवस्थ एवेति । न च शंखचक्रादिधारणधर्मस्य कौर्मपाञ्चरात्रागमसिद्धत्वेऽस्मत्सम्प्रदायस्य स्वल्पकालावधिप्रवर्तितत्वस्य भवद्भिर्बहुशः प्रतिपादितस्यासङ्गतिरिति वाच्यम्, शूद्राद्युचितत्वेन तस्य चिरन्तनत्वेऽपि त्रैवर्णिकेषु पातित्य-सम्पादकत्वेन स्वल्पकालावधि-प्रचलितत्वस्याऽस्मदभिप्रायविषयत्वादित्यलम् । यदुक्तं 'सोऽभिध्याय' इत्यादिवाक्यं मुक्तावव्युक्तार्थपरकमभिदधन्ननुरस्मत्सम्प्रदायं प्रदर्शितवानिति । तत्रोच्यते अभिध्यानपूर्वकसृष्टिप्रतिपादनमात्रेण विदधिवेदान्तसिद्धान्त इत्यत्रोपन्यासमात्रेण वा भवत्सिद्धान्त एव सिद्धान्तित इति कथं ज्ञातम् ? अभिध्यानपूर्विका सृष्टिरित्यस्याव्याकृतशक्तिविशिष्टस्य ब्रह्मणो जगत्कारणत्वमित्यर्थस्य चाद्वैतिवेदान्तिभिरपि स्वीकृतत्वेन तत्सिद्धान्तितार्थस्य प्रवेशसम्भवात् । अनेन श्लोकेनास्मत्प्रतितन्त्रार्थ एवाभिहित इत्युक्तेर्व्याहतत्वात् । मनोऽस्तु "ईक्षतेर्नाशब्दम्" इति सूत्रं प्रणयता वेदव्यासेनाचेतनप्रधानस्य जगत्कारणत्वनिराकरणेन वेदान्तिसिद्धान्त एव तात्पर्य्यमवसीयते । यदि स एव भवतां सिद्धान्तस्तर्हि अस्तु । परं च विशिष्टाद्वैतं भवद्भिरभिनिवेशेनाश्रितं परित्याज्यान्यदीयगृहित्वं किमर्थमिनावधीति विभावनीयम् इति तत्खण्डनम् इति ।

(२०)

व्या॰ वर्णाश्रमधर्माप्रतिपादनरूपप्रतिबन्धकमुद्भाव्येति किमभिप्रेत्येति न ज्ञायते। न हि वर्णाश्रमधर्माणां कुत्रचिदप्रतिपादनं कस्यचिदर्थस्य कुत्रचित्प्रतिपादनेऽप्रतिपादने वा प्रतिबन्धकं, यदि प्रतिबन्दिमुद्भाव्येति वक्तव्ये लेखकप्रमादस्तदा समीचीनम्। तत्रोच्यते इत्यादिकममनोरमम्। न हि तादृशसनकादिस्मृतीनां तैस्तैर्ग्रन्थकारैरस्मत्सम्प्रदायदूषणप्रवृत्तैरपि सम्यगुपलब्धानां स्वग्रन्थेषु बहुशो धृतानां भवदुपलम्भाभावमात्रेण सर्वथोपलम्भाभवस्तत्प्रयुक्ताऽस्मत्कल्पितत्वसम्भावना-तत्प्रयुक्ताप्रामाणिकत्वं च प्रामाणिकैर्वक्तुमुचितम्। न हि जन्मप्रभृति गम्भीरगिरिगुहास्वेव निरन्तरं वर्त्तमानैः कैश्चित्तैमिरिकजनैरदृष्टो जगच्चक्षुः सहस्रभानुः प्रमाणमार्गादवरोप्यः। भारतीयपञ्चरात्रागमस्य लुप्यमानताया इत्यादिना भारत एव बोधनादित्यन्तेन यदुक्तं तदालस्येन प्रद्वेषेण वा समस्तमोक्षधर्मीय-नारायणीयोपाख्यानादर्शनप्रयुक्तं प्रतिभाति। तथा हि तत्र श्वेतद्वीपगमनारायणीये,—

"अहो ह्येकान्तितः सर्वान् प्रीणाति भगवान् हरिः।"

इत्यादिना पूर्वं विस्तरेणोपदिष्ट-पाञ्चरात्रप्रक्रियाऽनुवादपूर्वकं,

"केनैष धर्मः कथितो देवेन ऋषिणापि वा।
एकान्तिनां च का चर्य्या कदा चोत्पादिता विभो!॥"

इति जनमेजयेन पृष्टस्य वैशम्पायनस्य वचनेन,

"समुपोढेष्वनीकेषु कुरुपाण्डवयोर्मृधे।
अर्जुने विमनस्के च गीता भगवता स्वयम्॥"

इति भगवत एवावान्तरप्रवर्तकत्वोक्तिव्याजेन गीता पाञ्चरात्रै-कार्थ्यं प्रकाश्य,

"एतदर्थं महाराज ! पृष्टः पार्थेन नारद।"

इत्यादिना पार्थं प्रति नारदोक्तिमुखेन,—

"यदासीन्मानसं जन्म नारायणमुखोद्गतम्।
ब्रह्मणः पृथिवीपाल ! तदा नारायणः स्वयम्॥
तेन धर्मेण कृतवान् दैवं पित्र्यं च भारत।
फेनपा ऋषयश्चैव तं धर्मं प्रतिपेदिरे॥
वैखानसाः फेनपेभ्यो धर्ममेतं प्रपेदिरे।
वैखानसेभ्यः प्राप्तस्तु ततः सोऽन्तर्दधे पुनः॥
यदासीत् चाक्षुषं जन्म द्वितीयं ब्रह्मणो नृप !।
तदा पितामहेनैव सोऽयं धर्मः परिश्रुतः॥
नारायणात्मको राजन् ! रुद्राय प्रददौ च तम्।
ततो योगस्थितो रुद्रः पुरा कृतयुगे नृप !॥
बालखिल्यान् ऋषीन् सर्वान् धर्ममेतदपाठयत्।
अन्तर्दधे ततो भूयस्तस्य देवस्य मायया॥
तृतीयं ब्रह्मणो जन्म यदासीत् वाचिकं महत्।
तत्रैष धर्मः संभूतः स्वयं नारायणान्नृप !॥
सुपर्णो नाम तमृषिः प्राप्तवान् पुरुषोत्तमात्।
तपसा वै सुतप्तेन दमेन नियमेन च॥
सुपर्णाच्चाप्यधिगतो धर्म एष सनातनः।
वायुना द्विपदां श्रेष्ठ ! कथितो जगदायुषा॥

वायोः सकाशात् प्राप्तश्च ऋषिभिर्विघसादिभिः ।
ततो महोदधिश्चैव प्राप्तवान् धर्ममुत्तमम् ॥
अन्तर्दधे ततो भूयो नारायणसमाहितः ।
यदा भूयः श्रवणजा सृष्टिरासीत् महात्मनः ॥
ब्रह्मणः पुरुषव्याघ्र ! तत्र कीर्तयतः शृणु ।
जगत्स्रष्टुमना देवो हरिर्नारायणः स्वयम् ॥"

इत्यारभ्य,

"धर्मं च मत्तो गृह्णीष्व सात्वतं नाम नामतः ।"

इति ब्रह्माणं प्रति हरिवचनमुक्त्वा,—

"धर्मं चाग्र्यं स जग्राह सरहस्यं ससंग्रहम् ।
आरण्यकेन सहितं नारायणमुखोद्गतम् ॥
ततो हि सात्वतो धर्मो व्याप्य लोकानवस्थितः ।
तेनैवाद्येन धर्मेण ब्रह्मा लोकविसर्गकृत् ॥
पूजयामास देवेशं हरिं नारायणं प्रभुम् ।
धर्मप्रतिष्ठाहेतोश्च मनुं स्वारोचिषं ततः ॥
अध्यापयामास तदा लोकानां हितकाम्यया ।
ततः स्वारोचिषः पुत्रं स्वयं शंखपदं ततः ॥
अध्यापयत् पुराऽव्यग्रः सर्वलोकपतिः प्रभुः ।
ततः शंखपदश्चापि पुत्रमात्मजमौरसम् ॥
दिशां पालं सुवर्णाभम् अध्यापयत भारत ।
सोऽन्तर्दधे ततो भूयः प्राप्ते त्रेतायुगे पुनः ॥
नासिक्यजन्मनि पुरा ब्रह्मणः पार्थिवोत्तम ।

धर्ममेतं स्वयं देवो हरिर्नारायणः प्रभुः॥
तन्मुखारविन्दाच्चो ब्रह्मणः पद्मतस्तदा।
सनत्कुमारो भगवान् ततः प्राधीतवान् नृप!॥
सनत्कुमारादपि च वीरणो वै प्रजापतिः।
कृतादौ कुरुशार्दूल! धर्ममेतदधीतवान्॥
वीरणश्चाप्यधीत्यैनं रैभ्याय मुनये ददौ।
रैभ्यः पुत्राय शुद्धाय सुव्रताय सुमेधसे॥
कुक्षिनामाय प्रददौ दिशां पालाय धर्मिणे।
ततोऽप्यन्तर्दधे भूयो नारायणमुखोद्भवः॥
अण्डजे जन्मनि पुनर्ब्रह्मणे हरियोनये।
एष धर्मः समुद्भूतो नारायणमुखात् पुनः॥
गृहीतो ब्रह्मणा राजन्! प्रयुक्तश्च यथाविधि।
अध्यापिताश्च मुनयो नाम्ना बर्हिषदो नृप!॥
बर्हिषद्भ्यश्च संप्राप्तः सामवेदान्तगं द्विजम्।
ज्येष्ठं नामाभिविख्यातं ज्येष्ठनाम व्रतो हरिः॥
ज्येष्ठाच्चाप्यनुसंप्राप्तो राजानमविकम्पनम्।
अन्तर्दधे ततो राजन्! एष धर्मः प्रभोर्हरेः॥"

इति श्रीपाञ्चरात्रधर्मस्य भूतान् षडाविर्भावतिरोभावानुपन्यस्य,—

"यदिदं सप्तमं जन्म पद्मजं ब्रह्मणो नृप!।
तत्रैष धर्मः कथितः स्वयं नारायणेन ह॥
पितामहाय शुद्धाय युगादौ लोककारिणे।

पितामहश्च दक्षाय धर्ममेतं पुरा ददौ ॥
ततो ज्येष्ठे तु दौहित्रे प्रादाद्दक्षो नृपोत्तम ! ।
आदित्ये सवितुर्ज्येष्ठे विवस्वान् जगृहे ततः ॥
त्रेतायुगादौ च ततो विवस्वान् मनवे ददौ ।
मनुश्च लोकभूत्यर्थं सुतायेक्ष्वाकवे ददौ ॥
इक्ष्वाकुणा च कथितो व्याप्य लोकानवस्थितः ।"

इति वर्त्तमानपाद्मकल्पीयप्रवृत्ति-परम्परोपदेशेन,—

"इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥"

इत्युक्तगीतार्थपरम्परा-स्मारकेण सूचितं प्रागुक्तगीतिकार्थ्यम्,—

"यतीनां चापि यो धर्मः स ते पूर्वं नृपोत्तम ।
कथितो हरिगीतासु समासविधिकल्पितः ॥"

इति स्फुटतरमुक्त्वा,—

"गमिष्यति क्षयान्ते च पुनर्नारायणं नृप ! ।"

इति तिरोभावस्य भविष्यत्त्वं निर्दिश्यते। न हि पार्थसमय उपरिचरो वसुरतिष्ठत्, न वा पार्थादनन्तरभावी । येन पार्थकाले भविष्यत्तया निर्दिष्टस्तिरोभावो वसुराजकालाव्यवहितानन्तरकालभावी स्यात्। अतः 'संस्थिते तु नृपे तस्मिन्' इति नाव्यवहितानान्तर्य्यमुच्यते, अपि तु क्षयान्तरभावि-पञ्चरात्रतिरोभावस्य वसुकालानान्तर्य्यमात्रमवलम्ब्य। तत्र धर्मिष्ठजनशून्ये काले 'नायं धर्मोऽवतिष्ठते' इत्येतद्धर्मस्तुत्यर्थमुच्यते। यदा उपरिचरे परलोकं गते तत्परम्पराविच्छिद्य इति एत-

ज्ञातपरं संक्षिप्ते क्षितिवचनम्। न तु परम्परान्तरविच्छेद-परमपि तदनन्तरमपि परम्परान्तराणां सत्त्वस्यानुपदमेव वक्ष्य-माणत्वात्। कथ्यते च तत्रैव वसोः परम्पराविशेषः "राजोपरि-चरो नाम" इत्यारभ्य,

"सात्वतं विधिमास्थाय प्राक्सूर्य्यमुखनिःसृतम्।
पूजयामास देवेशम्——————"

इति। अथ वास्तु उपरिचरानन्तरं कञ्चित्कालं भूलोके पूर्व-वदेव शास्त्रविच्छेदस्तथापि न दोषः। पुनर्नारदपरम्परया भूलोके प्रवृत्तिसम्भवात्। नारदस्य तु शास्त्रावगतिः साक्षाद्भग-वत एवेति। तत्रैव स्फुटमुच्यते,—

"नारदेन तु प्राप्तश्च सरहस्यः ससंग्रहः।
एष धर्मो जगन्नाथात् साक्षात् नारायणान्नृप ! ॥"

इति तथा मध्येऽपि,—

"प्राप्य श्वेतं महाद्वीपं नारदो भगवान् ऋषिः।"

इत्यादिना श्वेतद्वीपं गतस्य नारायणं तत्रादृष्टवतः पश्चात् तदीयस्तोत्रप्रीतेन प्रत्यक्षविषयीभूतेन भगवता,

"इमे ह्यनिन्द्रियाहारा मद्भक्ताश्चन्द्रवर्चसः।
एकाग्राश्चिन्तयेयुर्माम्——————"

इत्यादिना विस्तरेण पञ्चरात्रप्रक्रियोपदेश उच्यते। नारद-मुखात् प्रवृत्तिश्च तत्रैवोच्यते,—

"नारायणमुखोद्गीतं नारदोऽश्रावयत् पुनः।
ब्रह्मणः सदने तात ! यथादृष्टं यथाश्रुतम्॥

ये चान्ये ब्रह्मसदने सिद्धसङ्घाः समागताः ।
तेषां सकाशात् सूर्य्यस्तु श्रुत्वा वै भावितात्मनाम् ॥
आत्मानुगामिनां राजन् ! श्रावयामास वै ततः ।
षट्षष्टिर्हि सहस्राणि ऋषीणां भावितात्मनाम् ॥
सूर्य्यस्य तपतो लोकान् निर्मिता वै पुरःसराः ।
तेषामकथयत् सूर्य्यः सर्वेषां भावितात्मनाम् ॥
सूर्य्यानुगामिभिस्तात ! ऋषिभिस्तैर्महात्मभिः ।
मेरोः समागता देवाः श्राविताश्चेदमुत्तमम् ॥
देवानां तु सकाशाद्वै ततः श्रुत्वासितो द्विजः ।
श्रावयामास राजेन्द्र ! पितॄणां मुनिसत्तम ! ॥
मम चापि पिता तात ! कथयामास शन्तनुः ।
ततो मयापि श्रुत्वा च कीर्त्तितं तव भारत ॥
सुरैर्वा मुनिभिर्वापि पुराणं यैरिदं श्रुतम् ।
सर्वे ते परमात्मानं पूजयन्ति समन्ततः ॥"

वैशम्पायनः ।

"श्रुत्वैतदाख्यानपरं धर्मराड् जनमेजयः ।
भ्रातरश्चास्य ते सर्वे नारायणपराभवन् ॥"

सूतः ।

"एतत् ते सर्वमाख्यातं वैशम्पायनकीर्त्तितम् ।
जनमेजयेन तत् श्रुत्वा कृतं सम्यक् यथाविधि ॥
यूयं हि तप्ततपसः सर्वे च चरितव्रताः ।
शौनकस्य महासत्रं प्राप्ताः सर्वे द्विजोत्तमाः ॥

सूत्रेण स्मृत्यनवकाशदोषप्रसङ्ग इति सूत्रखण्डेन आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते इत्यादि-सूत्रजातेन च पूर्वपक्षार्थमन्ववददिति तत्तदधिकरणसिद्धान्तार्थाः पूर्वपक्षार्थविरुद्धा इति तदनभिमता उच्यन्ते कैश्चिन्निरूपकैः। अत्र यद्यपि पूर्वपक्षसिद्धान्तार्थत्वं नास्त्युभयोरर्थयोस्तथापि तत्तत्सूत्रार्थव्याख्यानप्रवृत्तैर्भाष्यकारैः पूर्वपक्षसिद्धान्तसूत्रव्याख्यानावसरे ते तेऽर्थाः प्रतिपादिता इति न सिद्धान्तार्थानां तदनभिमतत्वं केनचिदुत्प्रेक्षणीयम्। एवं तत्तद्गुणानुगुणं अत्युदितपुरुषार्थविशेष-तत्साधनप्रतिपादनावसरे तत्तदर्थेष्वधिकारिपुरुषाणां प्रोत्साहनार्थमुक्तं चेत् तदेवास्माभिमतं तान्यदिति न वक्तुं शक्यम् इति न तत्रास्मत्प्रतितन्त्रार्थप्रतिषेधः। अत उक्तरीत्या व्यासादीनामधिकत्वं युक्तमेव, यथा—तथोक्तरीत्या न्यूनत्वमपि सम्भवत्येव तत्तत्पुरुषानुगुणपुरुषार्थ-प्रतिपादकवेदभागोपबृंहणार्थं प्रवृत्तैस्तामस-राजस-सात्त्विक-धर्माणां साङ्कर्येण प्रतिपादनात्। तादृशपुराणादिभिरपि वेदैरिवास्माकं स्फुटतरप्रतिपत्तेरस्मत्प्रतितन्त्रार्थेष्वसम्भवात् अस्मदाचार्यैः सत्त्वगुणवदधिकारिविशेषापेक्षितपुरुषार्थविशेष-तदुपाययोरन्यार्थासङ्कीर्णयोरेव प्रतिपादिततयास्माकं झटिति स्फुटतरप्रतीतिरस्मत्प्रतितन्त्रार्थे भवति, अस्मद्विषये व्यासादयोऽस्मदाचार्यापेक्षया तत्तत्कृतोपकारविशेषनिरूपणेन न्यूना इत्युक्तौ न सर्वविषये तेषां न्यूनत्वमुक्तम्। यथा, कयाचित् पतिव्रतया, मम श्वशुरापेक्षया पतिरेवाधिक इत्युक्तौ न तत्पतिदेवरा-

दीनामपि तत्पत्यपेक्षया श्वशुरो न्यून इत्युक्तं स्यात्। एवमस्म-दाचार्य्यप्रोदितशास्त्रार्थानां श्रुतिपरमतात्पर्य्यविषयाणां व्यासा-दिभिरादरेण वक्तृषु स्वलेषूपवर्णितानां शास्त्रविरोधाभावेन संत्तमधर्मैस्तैः कस्यापि धर्मस्योपमर्दाभावेन भवदाशयस्य कथ-मपि सम्भवाभावेन धर्मविप्लवाभावेन च जिज्ञासा तादवस्था-भिधानासङ्गतेः। मदुत्तरलाभेऽपि यदि सा न निवृत्ता तदा तिष्ठतु पाषाणप्राया। अतएव न ममत्वमपीत्यादिकं च न सत् व्यासादीनामस्मदाचार्य्यापेक्षया वैषम्यस्यास्मदनभिमतत्वाभावात्। अतएव पराशरादयः,—

"तत्त्वेन यश्चिदचिदीश्वर-तत्स्वभाव-
भोगापवर्ग-तदुपायगतीरुदारः।
सन्दर्शयन्निरममीत पुराणरत्नं
तस्मै नमो मुनिवराय पराशराय॥"

इत्यादिना स्वग्रन्थादौ तत्कृतोपकाराऽनुसन्धानपूर्वकं नमस्कृता अस्मत्पूर्वाचार्य्यैः तथापि अस्मद्विषये उभयेषां समत्वे कोऽपि विरोधो न अस्मदपेक्षितार्थविषयकज्ञानस्योभयत्र तुल्यत्वात्। यथा बुभुक्षितस्यान्नप्रदो लक्षाधीशः कोट्यधीशश्चक्रवर्त्ती उत्कृ-ष्टचित्तिः पण्डितः पामरश्च तुल्या एव तथापि तेषु विद्यमानस्य वैलक्षण्यस्य न कोऽपि हानिः सार्वकालिक-सर्वज्ञानवतामस्म-दाचार्य्याणां त्वदारोपितात्पज्ञानवत्तया भवदुत्प्रेक्षिताधिक्यं व्यासादीनामस्तु, तथापि नास्मदुक्तविरोधः। अतस्तस्मादि-त्यादिव्याहतमित्यन्तं न समीचीनम्। मदुक्तसमत्व—न्यूनत्वाभ्यां

तदुक्ताधिकत्वस्याविरोधात् । *व्यासादेस्तपःप्रभावेत्यादिवैषम्य-सम्भवादित्युक्तमपि न समीचीनम् । यथा वा स्वीयभूषण-मण्डितायाः याचिताभरणमण्डितायाश्च सौन्दर्य्येण साम्यस्याभरणे स्वीयत्वयाचितत्वेन विरोधिनी लोके ज्ञानतो गुरुशिष्यौ तुल्याविति निरूपका अपि हि व्यवहरन्ति । एवं व्यासाद्यनुक्त-शास्त्रार्थस्येत्यादिकमपि अस्थानविजृम्भणम् । श्रेयःसाधनतयाऽस्मदाचार्य्याभिहितानां सर्वेषामर्थानां व्यासादिभिस्तत्र तत्र पुराणादिष्वसकृत् प्रतिपादनात् अश्रेयःसाधनतया तदुक्त एव चक्राद्यङ्कनरूपोऽर्थ इति कथमयं तद्विरुद्धोऽनर्थो वा भवितुमर्हति कथं वा तत्प्रवर्तकतयाऽधर्मो वेति ।

प्रश्न० समानाश्चेत् तदा तत्कर्तृकग्रन्थानां सर्वत्र प्रचारः कुतो न हीति ।

दुर्ज० इति पञ्चमवाक्यम् । अत्र भवदाचार्य्येभ्य इति विकल्पवाक्ये व्यासादीनामस्मदाचार्य्यप्रतियोगिकोपकर्षस्तत्प्रतियोगिकं साम्यं तत्प्रतियोगिक उत्कर्षश्च विकल्पितः । न्यूनाश्चेदित्यनेन प्रथमविकल्पार्थास्मदाचार्य्यावधिक-व्यासादिनिष्ठापकर्षदूषणमुक्तम् । अनेन वाक्ये नाविकल्पितव्यासादिप्रतियोगिकास्मदाचार्य्यनिष्ठसमत्वदूषणमुच्यते, तद्यद्यपि सन्दर्भविरुद्धं, तथापि मध्यमविकल्पार्थपर्य्यवसन्नास्मदाचार्य्य-निष्ठव्यासादिप्रतियोगिकसमत्वस्य तुल्यवित्तिवेद्यस्य दूषणमभिधित्सितमिति तदुद्धारोत्तरमुच्यते, समानाश्चेदित्यादिशङ्कावाक्यस्यायमर्थः । व्यासादीनां युष्मदाचार्य्यसमत्वे युष्मदाचार्य्याणां व्यासादिसमत्व-

मप्यावश्यकम्। एवं सति युष्मदाचार्य्यग्रन्थाः सर्वत्र कुतो न प्रचरन्तीति सर्वप्रचारो नाम सर्वेषामुपजीव्यत्वं व्याकरणादीनामिव स्यात्। अन्यविधप्रचारस्यासम्भवात् तादृशप्रचारस्त्वास्मदाचार्य्यग्रन्थानां न सम्भवति प्रतितन्त्रार्थविशेषनिष्ठतया सम्प्रदायविशेषवतामेव तद्ग्रन्थस्योपजीव्यत्वात् व्यासादिपरमर्षिप्रणीत-स्मृतीतिहासादिग्रन्थानां सर्वसम्प्रदायनिदानतया सर्वसम्प्रदाय्युपजीव्यत्वम्। यथा व्याकरणादीनां सर्वतान्त्रिकोपजीव्यत्वम् अस्मत्सम्प्रदायनिष्ठेषु तु सर्वत्र प्रचारोऽस्त्येवेति।

टी० अत्र भवदाचार्य्येभ्य इत्यादिना प्रश्नवाक्यार्थमुक्त्वा पञ्चमवाक्योक्तदूषणस्य प्रश्नवाक्योक्तविकल्पानुगुण्यं नास्तीत्याशंक्य समाधत्ते, अनेनेत्यादिना शङ्कावाक्यस्यायमर्थ इति अभिप्रेत इति शेषः। प्रचारश्चात्र ग्रन्थकर्तृकः क्रियारूपो न सम्भवतीति तदर्थमाह,—प्रचारो नामेत्यादिना। सर्वेषामुपजीव्यत्वमिति व्याकरणच्छन्दःप्रभृतीनां संस्कृतग्रन्थमात्रेऽपेक्षिततया तेषां सर्वोपजीव्यत्वमिति भावः। अस्मदाचार्य्यग्रन्थानां सर्वोपजीव्यत्वं नास्ति, परमसात्त्विकमुमुक्षुविशेषापेक्षितोपायोपेयमात्रप्रतिपादकतया पुरुषार्थेतरनिष्ठाधिकार्य्यानुपजीव्यत्वात्। व्यासादिकृतपुराणेतिहासस्मृत्यादीनां तु तत्तद्गुणानुगुण-तत्तत्पुरुषार्थ-तदुपायप्रतिपादकानां स्वगुणानुरूप-तत्तत्पुरुषार्थप्रेप्सूनामपेक्षितानामर्थानां प्रतिपादकतया सर्वोपजीव्यत्वमित्याह,—तादृशप्रचारस्येत्यादिना। प्रतितन्त्रविशेषनिष्ठतयेति प्रतितन्त्रार्थ-विशेषैकतात्पर्य्यकतयेत्यर्थः। सर्वसम्प्रदायनिदान-

तयेति सर्वसम्प्रदायार्थप्रमाणतयेत्यर्थः। युष्मत्सम्प्रदायिभिरपि सर्वैः कुतो नोपजीव्यत इत्याशंक्य सर्वास्मत्सम्प्रदाय्युपजीव्यत्वमित्याह,—अस्मदित्यादिना।

सर्व्व० इति रामानुजीयाः, समानाश्चेत् तदा तत्कर्तृकग्रन्थानां सर्वत्र प्रचारः कुतो न हीति पञ्चमवाक्यस्येत्थं तात्पर्य्यं भवदाचार्य्येभ्य इति विकल्पवाक्यानुरोधात् भवदाचार्य्यप्रतियोगिकसादृश्याऽनुयोगितो यदि व्यासादयस्तदा त्रैवर्णिकेषु भारतादयस्त्रिपुण्ड्ररुद्राक्ष-भस्मधारणबोधका व्यासादिकर्तृकग्रन्थाः स्वबोधितानुष्ठानाश्रयत्वसम्बन्धेन यथास्मादृशेषु प्रचरन्ति, तथा भवादृशेष्वपि सर्वत्र कुतो न प्रचरन्ति। सर्वत्रेति पदस्य दृष्टान्तदार्ष्टान्तिकत्वेनाभिमताशेषाधिकरणार्थप्रतिपादकत्वात् विशिष्टस्य शुद्धानतिरिक्तत्वादिति। एतेन समानाश्चेदित्यस्य व्यासादिप्रतियोगिक-सादृश्याऽनुयोगित्वविशिष्ट-विषयकबोधजनकत्वेन भवदाचार्य्येभ्य इति पूर्वविकल्पवाक्यानुरोधेन सन्दर्भाशुद्धिमुद्भाव्य तुल्यवित्तिवेद्यत्वेन सादृश्यस्य दूषणमभिधित्सया तदुद्धारं कुर्वाणाः परास्ताः। यदपि तत्र सर्वत्र प्रचारो नाम सर्वेषामुपजीव्यत्वं व्याकरणादीनामिव स्यादित्यारभ्यास्मत्सम्प्रदायनिष्ठेषु सर्वत्र प्रचारोऽस्त्येवेत्युत्तरं दत्तं, तदप्यसङ्गतम् व्यासादिकर्तृकनिरुक्तग्रन्थानां प्रचाराभावस्य भवादृशेषु सर्वदैव दर्शनात्। स्वयं प्रकल्पितसन्दर्भाशुद्धिदोषोद्धारार्थं सादृश्यस्य तुल्यवित्तिवेद्यतया व्यासादिप्रतियोगिकसादृश्याऽनुयोगित्वेन स्वाचार्य्याणां प्रकल्पिततया व्यासादिपरमर्षिप्रणीतस्मृतीतिहासादिग्रन्थानां

सर्वसम्प्रदायनिदानत्ववत् स्वाचार्य्यकर्तृकग्रन्थानामपि सर्वसम्प्रदायनिदानत्वापत्तौ। अधिकाश्चेत् तत्र प्रमाणं वक्तव्यमिति वाक्यतात्पर्य्यविषयीभूतव्यासादिनिष्ठाधिक्यसम्पादकहेतोः सर्वोपकारकत्वाद्यात्मकस्यामाङ्गत्यापत्तेश्च त्वलम् इति तत्खण्डनम् इति।

व्या० समानाश्चेदित्यारभ्य तत्खण्डनम् इत्यन्तं यदुक्तं तदपि प्रस्तावना प्रहसनस्य। तथा हि, चैत्रो मैत्रेण तुल्यस्तत् तत्तं राजा श्रेयसा कुतो न योजयतीत्युक्तौ तत्रैवं ज्ञायते, एकं श्रेयसा योजयति, अपरं न योजयति। तयोरुभयोस्तुल्यत्वे कथमिदं वैषम्यमिति। तत्र यं श्रेयसा न योजयति तत्परश्च तच्छब्दः। एवं प्रकृते व्यासादयो भवदाचार्य्यैस्तुल्याश्चेत् तत्कर्तृकग्रन्थानां सर्वत्र प्रचारः कुतो न हीति वाक्ये तच्छब्देन यदि व्यासादीनां परामर्शस्तदाऽस्मदाचार्य्यग्रन्थानां सर्वत्र प्रचारो भवदभ्युपगत इति वक्तव्यम्। अन्यथा व्यासादिग्रन्थानां सर्वत्र प्रचाराभावे हेतुपर्य्यनुयोगासम्भवात्। यथा चैत्रो मैत्रेण तुल्यश्चेच्चैत्रस्याद्याप्यागमनं कुतो नेति वाक्येन मैत्रस्यागमनं जातमिति ज्ञायते। अस्मदाचार्य्यग्रन्थानां च सर्वत्र प्रचारो नास्तीति भवतामाग्रहः। एवं स्वाभिप्रायविरुद्धमपि अस्मदुद्भावितसन्दर्भविरोध-दूषणभीत्योक्ततात्पर्य्यं कल्पयसि चेत्? तदा मधुमाक्षिकदंशनभीत्या पलायितस्य जले निमग्नस्य मकरावरोधः। त्रैवर्णिकेषु केषुचित् त्रिपुण्ड्ररुद्राक्षभस्मधारणबोधका भारतादयो यथा प्रचरन्ति, तथान्येषु त्रैवर्णिकेषु पञ्चरात्रोक्त-

प्रक्रियया परमसात्त्विकानुष्ठेयोपायोपेयबोधका मोक्षधर्मीय-नारायणीयोपाख्यानादिना भारतादयः प्रचरन्ति भस्म-त्रिपुण्ड्रादीनामिव चक्राद्यङ्कनस्यापि भारते अनुक्रमणिकाध्याय-मारभ्य नारायणाङ्कप्रख्यत्वं,—

"ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः ।
ययं हि तप्ततनवः सर्वे च चरितव्रता ॥"

इत्यादिना प्रतिपादनात् पद्मपुराणादिषु तत्प्रतिपादनं स्पष्ट-मेव । न हि परस्परविरुद्धसर्वार्थानामेकत्रोपसंहारः कर्तुं शक्यः अन्यथा तत्तद्वर्णाश्रमधर्मत्वेनोक्तानामध्यापनयाजनयुद्धगोरक्षण-शुश्रूषामौञ्ज्यजिन-धारणातिथिसत्काराग्निहोत्रवनैकवासत्रि-दण्डधारणाग्न्युद्वासनादीनां सर्वेषामेकत्रोपसंहारापत्तेः, तेषां तत्तद्वर्णाश्रमासाधारणतया शास्त्रे प्रतिपादितत्वान्नैकत्रोपसंहारः कर्तुं शक्य इति चेत्? तर्हि भस्मरुद्राक्ष-त्रिपुण्ड्रधारणादीना-मुपमन्युप्रभृतिशैवैकानुष्ठेयानां वैष्णवेषूपसंहारो न युक्त इति पश्यतु भवान् स्वबोधिताऽनुष्ठानाश्रयत्वसम्बन्धेनेति वदताऽस्मदु-क्तार्थ एव मुखान्तरेण स्वीकृतः । परन्तु भारतोक्तविष्णुपूजनादि यत्किञ्चिद्धर्मानुष्ठातृष्वपि सर्वस्य भारतस्य प्रचारो जात इति भवतामेव पाशा रज्जुः स्वबोधित-यावदर्थानुष्ठातृत्वसम्बन्धेनेत्यु-क्तावसम्भव उक्त एव अस्मदुक्तार्थे तु नायं दोषः तत्तत्सम्प्रदाय्युप-जीव्यत्वस्य तत्र सत्त्वात् । किं च सर्वत्रेति पदस्य दृष्टान्तदार्ष्टान्ति-त्वेनाभिमताशेषाधिकरणार्थप्रतिपादकत्वाद्विशिष्टस्य शुद्धानति-रिक्तत्वादिति वदद्भिः स्वीयशास्त्रार्थनिर्वचनचातुर्य्यं सम्यगावि-

ष्कृतम्। अशेषत्वे सत्यनेकत्वविशिष्टं वाचकस्य सर्वपदस्याधिकरणेपर्य्यन्तार्थासम्भवात् सर्वनाम्नां लक्षणायास्तान्त्रिकैरनङ्गीकाराच्च सप्तम्यर्थेऽधिकरणे सर्वपदार्थान्वय इत्यपि न सम्भवति अधिकरणत्वस्याधेयत्वस्य वा सप्तम्यर्थत्वात् प्रातिपदिकलिङ्गपरिमाणवचनातिरिक्ते विभक्त्यर्थे प्रकृत्यर्थस्याभेदसम्बन्धेनान्वयस्याव्युत्पन्नत्वात्। तादृशान्वयस्वीकारेऽपि न निस्तारः, तथा सप्तम्यर्थाधिकरणस्यैव प्रचाराभावं प्रत्युद्देश्यता वक्तव्यतया विभक्त्यर्थस्योद्देश्यतायाः क्वाप्यदृष्टत्वात् प्रचाराभावे विधेये तस्यान्वयो न सम्भवति, आधाराधेयभावसम्बन्धेनान्वयस्वीकारे तु घटो जलमित्यपि प्रयोगापत्तिः घटाभिन्नप्रातिपदिकार्थस्याधाराधेयभावसम्बन्धेन जलेऽन्वयस्याबाधितत्वात्। ननु विशेष्यवाचकपदं भवताप्यध्याहर्तव्यमेवैवं चाधिकरणेष्वित्यध्याहारेण योजनाकर्तव्येति चेत् न सर्वत्रेति पदस्येति कथनासङ्गतेः। किं चात्राधिकरणत्वावच्छिन्नमुद्दिश्य प्रचाराभावो विधीयते सर्वपदार्थशेषत्वं चोद्देश्यतावच्छेदकव्यापकविधेयव्याप्यपर्य्याप्तिकधर्मवत्त्वं सा च पर्य्याप्तिरधिकरणवृत्तियावत्त्वस्य न भवितुमर्हति तस्याः प्रचाराभावाव्याप्यत्वात् भवादृशेषु व्यभिचरितत्वात्। अतएव मनुष्यास्तिकादिवृत्तियावत्त्वस्यापि न भवति। सर्वत्र युष्मास्वित्यपि न स्वबोधित-यत्किञ्चिदनुष्ठानाश्रयत्वस्यास्मासु सत्त्वात्। तादृश-यावदनुष्ठानस्य भवादृशेष्वप्यसत्त्वात् दृष्टान्तासिद्धेः। किं च सर्वपदेन दृष्टान्तभूतानां भवादृशानां दार्ष्टान्तिकानामस्मादृशानां च विवक्षणे विधेयधर्मस्य प्रचाराभाव-

यत्राध्वं सुकृतैर्यज्ञैः शाश्वतं परमेश्वरम्।
पारम्पर्य्यागतं ह्येतत् पित्रा मे कथितं पुरा॥"

इति तत्रैव स्थलान्तरेऽपि पाञ्चरात्रप्रकारमुक्त्वा,—

"एवं स भगवान् व्यासो गुरुर्मम विशां पते!।
कथयामास धर्मज्ञो धर्मराज्ञे द्विजोत्तम!॥
ऋषीणां सन्निधौ राजन्! शृण्वतोः कृष्णभीष्मयोः।
तस्याप्यकथयत् पूर्वं नारदः सुमहातपाः।
देवं परमकं ब्रह्म श्वेतं चन्द्राभमच्युतम्।
यत्र चैकान्तिनो यान्ति नारायणपरायणाः॥"

इति तत्रैवाग्रेऽपि,—

"एष ते कथितो धर्मः सात्वतः कुरुनन्दन!।
कुरुष्वैनं यथान्याय्यं यदि शक्नोषि भारत।
एवं हि स महाभागो नारदो गुरवे मम।
श्वेतानां यतीनां च एकान्तगतिमव्ययाम्॥
व्यासश्चाकथयत् प्रीत्या धर्मपुत्राय धीमते।
स एवायं मया तुभ्यमाख्यातः प्रसृतो गुरोः॥"

इत्युक्तम्। अत उपरिचरादनन्तरं नारदेन पुनः प्रवर्तनं प्रामाणिकम्। अतएवैतस्य लोक इदानीं नारदपञ्चरात्रमिति प्रसिद्धिः। भीष्मपर्वणि च पञ्चमदिनरात्रौ दुर्य्योधनं प्रति भीष्मवचनम्,—

"ब्राह्मणैः क्षत्त्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः।
सेव्यतेऽभ्यर्च्यते चैव नित्ययुक्तैः स्वकर्मभिः॥

सात्वतं विधिमास्थाय गीतः सङ्कर्षणेन यः।
द्वापरस्य युगस्यान्ते आदौ कलियुगस्य च॥"

इति कलियुगादौ पाञ्चरात्रप्रचारः स्फुटतरमुक्तः। किं च यद्युपरिचरानन्तरमेव शास्त्रविलोपस्तर्हि तदनन्तरकालिकै-र्युधिष्ठिर-जनमेजय-शन्तनु-भीष्मप्रभृतिभिः कथं तदनुष्ठानम्? तेषामनुष्ठानं ह्युक्तवचनेषु स्फुटम्। अपि च वसोरनन्तरं शास्त्रविलोपे शङ्करभास्करादिभाष्यकाराणां वसोरत्यन्तमन-न्तरभाविनां कथं तदर्थोपन्यासः? उपन्यस्तश्च तैरुत्पत्त्यसम्भ-वात्। न च कर्तुः करणमित्यादिसूत्रभाष्ये अतः संशयितेत्यस्य पूर्वोक्त एवार्थः। एवं च भवतां वादपारावारपारजिगमिषूणां पर्वतीयचक्रपाणिविरचितपत्रदग्धपोतावलम्बनं गुरुतरदृषदुन्धन-मेव यथोपलभ्यमानस्य चेदानीं कुण्डगोलकाद्यर्थताया इत्या-दिना कौर्मवचनोपन्यासपूर्वकमुक्तं तदतितुच्छम्। न हि सात्वतराजप्रवर्तितत्वात् सात्वतमित्युच्यते, किन्तु प्रागेव अव-गाजसृष्टौ,—

"ततो हि सात्वतो धर्मो व्याप्य लोकानवस्थितः।
तेनैवाद्येन धर्मेण ब्रह्मा लोकविसर्गकृत्॥
पूजयामास देवेशं हरिं नारायणं प्रभुम्।"

इति "राजोपरिचरो नाम" इत्यारभ्य,

"सात्वतं विधिमास्थाय प्राक्सूर्यमुखनिःसृतम्।
पूजयामास देवेशम्——————————"

इति च तथैव प्रसिद्धम्। किं च सात्वतेनापि राज्ञा नारद-

वचनादवगत्य स धर्मोऽनुष्ठित इति नारदस्य वचनात् 'वासुदेवार्चने रतः' इति वचनेन ज्ञायते। तेन प्रवर्त्तनं च नारदोपदिष्टस्य तस्यानुष्ठानपर्य्यन्तोपदेश एव 'कुण्डगोलादिभिः श्रितम्' इत्यनेन चोपासनादिर्वैदिकमोक्षोपायानधिकारिणामनुष्ठानार्ह इति ज्ञायते। न तु तैरेवानुष्ठेय इति अन्यथा,—

"एष ते कथितो धर्मः सात्वतः कुरुनन्दन!।
कुरुष्वैनं यथान्याय्यं यदि शक्नोषि भारत॥
ततो मयापि श्रुत्वा च कीर्तितं तव भारत।
सुरैर्वा मुनिभिर्वापि पुराणं यैरिदं श्रुतम्॥
सर्वे ते परमात्मानं पूजयन्ति समन्ततः।" इति।
श्रुत्वैतदाख्यानपरं धर्मराड् जनमेजय।
भ्रातरश्चास्य ते सर्वे नारायणपराभवन्॥" इति।
"एतत् ते सर्वमाख्यातं वैशम्पायनकीर्तितम्।
जनमेजयेन तत् श्रुत्वा कृतं सम्यक् यथाविधि॥"

इत्यादिमहाभारतीय-नारायणीयोपाख्यानवचनैः,—

"ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः।
सेव्यतेऽभ्यर्च्यते चैव नित्ययुक्तैः स्वकर्मभिः॥
सात्वतं विधिमास्थाय ——————"

इत्यादिवचनैश्च विरोधात्। अतएव पञ्चरात्रागमस्य द्वितीयत्वमपि नोत्प्रेक्षार्हम्। यत्तु भारतीय-पञ्चरात्रागमे शंखचक्रादिविधानाभावेनेत्यादिकं तदतिदुर्वचम्। उपरिचरवसुनारमन्तर्हितत्वेन भवदभिमतो भारतीय-पञ्चरात्रागमो भवद्भिः

कथमुपलब्धः ? उपलब्धश्चेत् तदाऽस्माकं दर्शनीयः । यदि तत्रा-ऽप्यौतितन्मार्थो न दृश्यते तदा युष्मद्वचनस्याप्रामाण्यं नाव-गच्छामः । यत्तु न च इत्यादिनाशंक्य समाधानं कृतं तत् पामराणामप्युपहास्यम् । शूद्राद्युचितत्वेन चिरन्तनत्वे कथं त्रैवर्णिकोचितत्वेन स्वल्पकालावधि प्रचलितत्वम् । त्रैवर्णिकेषु पातित्यसम्पादकत्वेनेति चेत् अभिचारकर्मणः श्येनादेस्त्रैवर्णिके-ष्वनुष्ठातृषु पातित्यसम्पादकस्य तथा त्वापत्तेः । एवं त्रैवर्णि-कोचितत्वेन चिरन्तनानां सन्ध्योपासनादीनामनुष्ठातृषु शूद्रा-दिषु पातित्यसम्पादकत्वेन तथा त्वापत्तेश्च । किं च शूद्रा-द्युचितत्वं न तेषां त्रैवर्णिकेषु पातित्यसम्पादकत्वे प्रयोजकम्, तादृशानां सत्यार्जवानां त्रैवर्णिकेषु पातित्यप्रयोजकत्वादर्शनात् एतादृशेष्वर्थेषु स्वपरव्याघातेषु भवतामेवाभिप्रायः, सोऽपि भव-द्भिरेवोद्घाटनीयः न त्वन्यैर्वाग्मिभिरिति । यत्तु यदुक्तमित्यादि इत्युक्तेर्व्याहतत्वादित्यन्तं तद्दूरतः परास्तम् । न ह्यभिध्यान-पूर्वक-सृष्टि-प्रतिपादनमात्रेणास्मत्सिद्धान्तावगतिमनुवाक्य-टीका कृताऽस्माभिर्वोच्यते सृष्टेरभिध्यानपूर्वकत्वाभिधानेन साङ्ख्याभि-मत-कारणत्वस्यैव व्यावृत्तेः, किन्तु "शरीरात् स्वात् सिसृक्षु-र्विविधाः प्रजाः" इत्यनेन तेन हि वाक्येन नामरूपविभागा-नर्हत्वलक्षणसूक्ष्मावस्थावस्थितचिदचिच्छरीरकस्य परस्य ब्रह्मणः जगत्कारणत्वं प्रतिपाद्यते । तादृशं च कारणं न मायावादि-सम्मतम् । शरीरादिति हि सृष्ट्युपयोगिविशेषणमभिदधाति । तत्र पूर्वोक्तचिदचिच्छक्तिरेवातो नाद्वैतवेदान्तिसिद्धान्तप्रवेश-

शास्त्रपृथक्त्वोपात्तश्रमं न वा। यदि मनुवचनव्याख्यातुः शास्त्रदर्शनव्यावृत्तौ वेदान्तसिद्धान्ते "ईश्वरो ब्रह्म" इत्यादिरत्वेव एवाभिमतः स्यात्। तदा चिदखण्डीति न वदेत्।

प्रश्न० भवदाचार्य्येभ्यः पूर्वाचार्य्या व्यासादयो न्यूनाः समाना वाऽधिका: ? न्यूनाश्चेत् ? सकलमार्गविप्लवः स्यादिति।

दुर्ज० इति चतुर्थं वाक्यम्। तत्रेदमुत्तरम्। न्यूनाः समाना अधिकाश्चेति अधिकत्वं तावदित्थम्। व्यासादीनामधिकारविशेषनियतत्वादस्मदाचार्य्याणामपि स्वसम्प्रदायप्रवर्त्तनोपजीव्यवेदोपबृंहणपुराणेतिहासविद्यास्थानभूतमीमांसादिकर्तृत्वात् तत्कृतोपबृंहणविद्यास्थानादिकमुपजीव्यसम्प्रदाय-प्रतिपादकत्वादस्मदाचार्य्याणाम् समत्वं तावदित्थम्। तत्कृतविद्यास्थानादिपर्य्यालोचनेनापि तत्र तत्रावश्योत्प्रेक्षणीय-युक्तिविशेषनिबन्धनरूपभाष्यादिमहत्तरग्रन्थनिर्माणोपयोगि-सर्वविषयकज्ञानवत्त्वात्। न्यूनत्वं तावदित्थम्। अस्मदाचार्य्या यथाऽस्माकमसङ्कीर्णार्थविशेषोपपादनमुखेन ज्ञानाऽनुष्ठाने उत्पाद्यमोक्षसिद्धिपर्य्यन्तदशाविशेषसम्पादकास्तथा न व्यासादय इति। यथा वा गुरुपरमगुर्वोः समागमे शिष्यस्य गुरुरनुवर्त्तनीयस्तथा न परमगुरुरिति शास्त्राचारसिद्धम्। अतो न्यूनाश्चेदित्यादिदूषणमप्यकिञ्चित्करम् आकारविशेषेणाधिकत्वे सर्वतो न्यूनत्वानिरूपणात् इति।

टी० पूर्वाचार्य्या व्यासादयो भवदाचार्य्योविधिकापकर्षवन्तः तादृशसाम्यवन्तस्तादृशोत्कर्षवन्त इति प्रश्नार्थः। सम्प्रदायप्रवर्त्त-

मेत्यादिस्मृत्यादीनां सम्प्रदायप्रवर्तनोपजीव्यत्वं च तदपेक्षित-प्रमाणत्वेन व्यासादिक[illegible]क-स्मृत्यादीनामेवोपजीव्यत्वमित्यत्र विनिगमकमाह,—वेदोपबृंहणेति। मीमांसायां विद्यास्थानत्वाभिधानं स्मृत्यादीनामप्युपलक्षणम्। अत इति वक्ष्यमाणयुक्तेरित्यर्थः। आकारविशेषणान्यूनत्वेऽपीति अयं मत्तो वयसाऽधिको विद्यया न्यून इत्यादाविवेति भावः।

सम्प्र० इति रामानुजीयाः, अथ भवदाचार्य्येभ्यः पूर्वाचार्य्या व्यासादयो न्यूनाः समाना अधिका वा? न्यूनाश्चेत्? सकलमार्गविप्लवः स्यात, समानाश्चेत् तत्कर्त्तकग्रन्थानां सर्वत्र प्रचारः कुतो न? अधिकाश्चेत? तत्र प्रमाणं वक्तव्यमित्यस्मत्प्रश्नः। तत्र यत् स्वसम्प्रदायप्रवर्तनोपजीव्यवेदोपबृंहणपुराणेतिहासविद्यास्थानभूतमीमांसादिकर्त्तृत्वेन व्यासोक्तपुराणादीन्युपजीव्य स्वसम्प्रदायप्रवर्त्तकत्वेन व्यासादिवत् सर्वविषयकज्ञानवत्त्वेन च स्वाभिलषितश्रेयःसाधनीभूतशास्त्रार्थप्रतिपादनद्वारा विशेषतया परमार्थसम्पादकत्वेन च न्यूनाः समाना अधिकाश्चेत्युत्तरमुक्तम्। तत्रोच्यते, न्यूनत्वं तावन्न सम्भवति, व्यासादीनां तत्प्रोदितपुराणेतिहासविहितानुष्ठानस्य श्रुतिस्मृतिप्रामाण्याभ्युपगन्तृ-शिष्टैर्निर्विवादतयाऽङ्गीकरणात् त्वदाचार्य्यप्रोदितशास्त्राविहितानर्थजनकशङ्खाङ्कनादीनां प्रतिषिद्धत्वाच्चातएव न समत्वमपि व्यासादीनां तपःप्रभावजनित-सर्वविषयकसर्वकालीनज्ञानवत्त्वेन भवदाचार्य्यापेक्षया वैषम्याच्च भवदाचार्य्याणामल्पविषयकज्ञानवत्त्वस्य व्यासादिनिष्ठाधिकत्वप्रतिपादकत्वात् प्रतिपादितयुक्ते-

देवावगतत्वात् तस्मादधिकत्वमेव व्यासादीनां सम्भवति त्वया प्रतिपादितं चैवं सति न्यूनत्वं समत्वं चास्मत्तात्पर्य्यविषयीभूतं सम्भवत्येवेति त्वदुक्तं व्याहतम्। व्यासादेस्तपःप्रभावसमुत्पन्नज्ञानवत्त्वेन भवदाचार्य्यस्य तदुक्तपर्य्यालोचनजन्यज्ञानवत्त्वेन च वैषम्यसम्भवात् व्यासाद्यनुक्तशास्त्रार्थस्य श्रेयःसाधनत्वासम्भवेन तदुक्तश्रेयःसाधनशास्त्रार्थानुवादमात्रेण स्वकीयपरमार्थसम्पादनस्य भवद्भिः स्वयमपि कर्तुं शक्यतया भवद्भ्योऽप्याधिक्यासम्भवाच्च। अर्थसाधनीभूत-तदुक्तेतिहासपुराणादिविरुद्धार्थस्य चक्राद्यङ्कनरूपस्यानर्थस्य प्रवर्तकतया धर्माधर्मवत्तया न्यूनाधिकभावकथाया अतोऽप्यसामञ्जस्यात् न किञ्चिदेतदित्यतो न्यूनाश्चेद्भवदाचार्य्येभ्योऽधर्मप्रवर्तकेभ्यस्तदाऽधर्मोपमर्दितसकलसद्धर्ममात्रविप्लवो भवेदिति अस्मज्जिज्ञासा-तदवस्थैव इति तत्खण्डनम् इति।

व्या० अथेत्यादिनोत्तरमुक्तमित्यन्तेन स्वीयप्रश्नानुवादपूर्वकमस्मदुक्तोत्तरमनूद्य तत्रोच्यते इत्यादिना इति तत्खण्डनम् इत्यन्तेन यदुक्तं तददृष्टार्थतयाऽस्मद्विजयकारणायेति निश्चीयते। न्यूनत्वं तावन्न सम्भवतीति प्रतिज्ञाय तद्धेतुतया तत्प्रोदितेत्याद्युक्तम् तत्स्वरूपासिद्धहेतूपपादनम्, पुराणेतिहासयोर्वेदोपबृंहणयोर्विधायकत्वमेव नास्ति। तादृशपुराणेतिहासप्रतिपादितानुष्ठानस्य श्रुतिस्मृतिप्रामाण्याभ्युपगन्तृ-शिष्टैर्निर्विवादतयाऽङ्गीकारेऽस्मदाचार्य्योक्तार्थविशेषानुष्ठानमपि तादृशशिष्टैरङ्गीकृतमेव। निर्विवादतया तस्यापि व्यास-पराशर-वसिष्ठ-हारीत-सनकादिपरमर्षिप्रणीत-पद्मपुराण-वराहपुराण-स्मृत्यादिषु सम्यक्

प्रतिपादितत्वात्। यदि तत्तत्पुराणस्मृतिषु व्यासादिकर्तृकत्वे तव विप्रतिपत्तिस्तदा भवदभिमताऽनुष्ठानप्रतिपादनं कुत्रेति प्रश्ने त्वयैव तूष्णीं स्थातव्यम्, पुराणान्तरस्यास्मत्प्रतितन्त्रार्थाप्रतिपादकस्य कुत्राप्यदर्शनात्, दर्शने वा तत्रापि तवैव विप्रतिपत्तिपक्षे सम्भवात्। यदि वेदोक्तार्थप्रतिपादकं यद्यत् तत्सर्वं तदुक्तमन्यत्तद्विपरीतं न तदुक्तमिति ब्रूषे? तदाऽस्मत्प्रतितन्त्रार्थस्तदुक्तश्चेत् तत्प्रतिपादकपुराणादिकमपि तदुक्तमिति त्वयापि स्वीकर्तव्यम्। तथा चास्मत्प्रतितन्त्रार्थ-प्रतिपादकश्रुतीनामनन्यपराणां बहुशोऽस्माभिस्तत्र तत्रोक्ततया तासामन्यथासिद्धेः। सुरगुरुणापि वक्तुमशक्यतया त्वदाचार्य्यप्रोदित-शास्त्राविहितानर्थजनकेत्यादिशिष्टगर्हितवाचो विहाय तूष्णीं भव प्रतिषिद्धत्वाच्चेत्यसत्। अत्र प्रतिषेधो न कुत्रापि श्रुतौ दृश्यते। यदि तामसपुराणादिषु तत्प्रतिषेध उपलभ्यते इत्युच्यते, तदा श्रुतिविपरीतार्थप्रतिपादकानां तामसधर्मप्ररोचकानां तेषां स्वार्थेऽप्रामाण्यमेव। श्रुतिविरुद्धार्थप्रतिपादकस्मृतीनामप्रामाण्यं प्रमाणलक्षणे सम्यगुपपादितं भगवता जैमिनिना। श्रुतिर्हि "मातापितृसहस्रेभ्यो वत्सलतरा भगवती सत्वरजस्तमोगुणप्रचुरतत्तत्पुरुषापेक्षित-तत्तत्पुरुषार्थ-तत्तत्साधनमवगमयति।" गीतश्चायमर्थो भगवता 'त्रैगुण्यविषया वेदा' इत्यनेन। एवं तादृशश्रुत्युपबृंहणे प्रवृत्ताश्च व्यासादयो महर्षयस्तादृशश्रुत्युक्तार्थान् सर्वानवदन्। तावता नास्मदाचार्य्योक्तानामर्थानां प्रतिषेधः। न हि सूत्रकारः "परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः" इति

स्यान्वयोऽपि न सम्भवति, महानसवद् ह्रदो वह्न्यभाववानिति प्रयोगादर्शनात् । स्वर्णवत् करीषं न महार्घमिति विपरीतदृष्टान्तस्थले तथा विवक्षासम्भवेऽपि स्त्रीपुमपत्यवतश्चैत्रस्य सर्वाण्यपत्यानि न पुमांस इति प्रयोगादर्शनेनैकपदोपात्तेषु कश्चित् प्रतियोगिनः कश्चिदभावस्यान्वयासम्भवात् । विशिष्टस्य शुद्धानतिरिक्तत्वाभिधानं च स्वपाण्डित्यख्यापनैकार्थं नात्र कस्यचिदुपपादकम् । अतएव एतेनेत्यादिभिरास्ता इत्यन्तमपि शब्दमात्रसारम् । भवदुपवर्णितार्थस्य कथमप्यसम्भवेनास्मदुक्तरीतेरेवानुसरणीयत्वात् दूषणमभिधित्सयेति त्वया स्वीयाव्युत्पत्तिरपि प्रदर्शिता । अनन्वितं शास्त्रविरुद्धं च प्रयुञ्जानेन यत्तु यदपीत्यादिसर्वदैव दर्शनादित्यन्तम् एतदतीवासमञ्जसम् । भारतपद्मपुराण-वराहपुराणादिबहुप्रमाणोक्ताचारविशेषाणामस्मास्विदानीमपि भवद्भिरप्यनुभूयमानत्वात् तदभावे के भवद्भिरधिक्षेप्याः । यत्तु स्वयं प्रकल्पितेत्यादि अलमित्यन्तं तद्भवतामेव रमणीयम् । तद्गतधर्मवत्त्वरूपसादृश्यस्य तुल्यावित्तिवेद्यतया व्यासादिसादृश्यस्यास्मदाचार्य्येषु यावदस्मत्प्रतितन्त्रार्थज्ञानवत्त्वरूपस्याङ्गीकारे व्यासादिग्रन्थस्येवास्मदाचार्य्यग्रन्थस्य सर्वसम्प्रदाय्युपजीव्यत्वं कथमापद्येत । न हि महानस इव पर्वतो वह्निमानित्युक्तौ पर्वते व्यञ्जनाद्यापत्तिं कश्चित् ब्रूयात् । अतोऽस्मदाचार्य्योक्तग्रन्थानां सर्वसम्प्रदाय्युपजीव्यत्वानापत्तेर्व्यासादिनिष्ठाधिक्यहेतोः सर्वसम्प्रदाय्युपजीव्य-ग्रन्थनिर्मातृत्वस्य नासङ्गतिः ।

प्रश्न० अधिकारश्चेत् तत्र प्रमाणं वक्तव्यमिति ।

दुर्ज० इति षष्ठं वाक्यम्। तत्रेदमुत्तरम्, आधिक्यं तूक्तरीत्याऽस्येव व्यासादीनां सकलसम्प्रदायमूलभूतवेदोपबृंहणस्मृत्यादिप्रणयनेन सर्वोपकारकत्वात्। अस्मादृशां वेद-तदुपबृंहणार्थबोधन-तदर्थानुष्ठापनादिमुखेनास्मदाचार्य्याणामेवोपकारकत्वातिशयः। अत्र प्रमाणं च,—

"गुरुरेव परं ब्रह्म गुरुरेव परा गतिः।"

इत्यारभ्य,—

"यस्मात् तदुपदेष्टासौ तस्मात् गुरुतरो गुरुः।"

इत्यादिश्रुतिरपि "मातृदेवो भव पितृदेवो भवाचार्य्यदेवो भव" इत्यादिका न ह्यत्राचार्य्यपदं व्यासादिसाधारणाचार्य्यपरं वेदमनूच्य "आचार्य्योऽन्तेवासिनमनुशास्ति, सत्यं वद धर्मं चर" इत्यादिप्रकरणस्याचार्य्यपदैकार्थ्यादिति।

टी० प्रश्नवाक्यं तत्रेति आधिक्य इत्यर्थः। प्रमाणं वक्तव्यमिति अनेनास्मदाचार्य्यावधिक-व्यासादिनिष्ठाधिक्ये वास्मदुक्तरीत्या व्यासाद्यवधिकास्मदाचार्य्यनिष्ठाधिक्ये वाप्रमाणप्रश्नः कृतः। यदि प्रथमः पक्षस्तदाह,—आधिक्यन्त्वित्यादि। तथा च सकलसम्प्रदायमूलभूतवेदोपबृंहण-स्मृत्यादिप्रणयनेन सर्वोपकारकत्वमस्मदाचार्य्यस्यादृत्तं प्रमाणमित्यावेदितमिति भावः। यदि द्वितीयः पक्षस्तदाह,—अस्मादृशामित्यादिना। वेद-तदुपबृंहणस्मृत्यादिविचारासमर्थानामस्मादृशां सर्वशाखाप्रत्ययन्यायसर्ववेदान्तप्रत्ययन्यायविचारपुरःसरं वेदादिप्रमाणानामर्थं निश्चित्य भाष्यादिग्रन्थान् निर्मायोपदिश्य तदनुष्ठानपर्य्यन्तमवस्था-

विशेषानापाद्योपकृतवतामतिशयितोत्तारकत्वमेव तत्र प्रमाण-मिति भावः। अत्र उत्तारकत्वातिशये गुरुरेवेति। अत्र बृंहति बृंहयति तस्मादुच्यते, परं ब्रह्म।

"बृहत्त्वात् बृंहणत्वाच्च तद्ब्रह्मेत्यभिधीयते।"

इति श्रौतस्मार्त्तनिर्वचनोक्तबृंहणत्वमादाय ब्रह्मशब्दप्रयोगः। तदुपदेष्टा मन्त्रविशेषोपदेष्टा गुरुतर इति,—

"गुकारस्त्वन्धकारः स्यात् रुकारस्तन्निरोधकः।
अन्धकारनिरोधित्वात् गुरुरित्यभिधीयते॥"

इत्युक्ताज्ञाननिरोधिषु श्रेष्ठ इत्यर्थः। 'आचार्य्यदेवो भव' इत्या-दिकेति। नन्वाचार्य्यपदस्यास्य व्यासादिसाधारणस्य कथं व्यक्ति-विशेषपरत्वमत आह,—न ह्नेति।

सञ्ज० इति रामानुजीयाः, यत्त्वधिकास्चेत् तत्र प्रमाणं वक्त-व्यमिति प्रश्नोत्तरे सकलसम्प्रदायमूलभूतवेदोपबृंहणस्मृत्यादि-प्रणयनेन सर्वोपकारकत्वमभिधाय व्यासादिनिष्ठमाधिक्यं प्रोच्य "गुरुरेव परं ब्रह्म" इत्यादिभिः स्वगुरोराधिक्यमुक्तम्। तद-प्यसङ्गतं, विकल्पासहत्वात्। तथा हि निरुक्तहेतुना व्यासादि-निष्ठमाधिक्यं यत्त्वयोक्तं तत्त्वयाऽभ्युपगम्यते, याथार्थ्येन न वा? नाद्यो गुरुरेवेत्यादिनाऽसाधारण्येन गुरोराधिक्यप्रतिपादनासा-ङ्गत्यापत्तेः। न च व्यासादीनामपि गुरुत्वान्नासाङ्गत्यमिति वाच्यम्, निरुक्तहेतुना तन्निष्ठाधिक्यप्रतिपादनप्रयासस्य वैफ-ल्यापत्तेः। न द्वितीयः। त्वया प्रतिपादितस्य तन्निष्ठसर्वोपकार-कत्वस्यासाङ्गत्यापत्तेरित्यलम् इति तत्खण्डनम्।

व्या० यत्तु तदप्यसङ्गतमित्यादि तन्न समीचीनं व्यासादि-निष्ठाधिक्यस्य याथार्थ्येनास्माभिरभ्युपगतत्वात्। गुरुरेवेत्यादि-ग्रन्थस्यास्मदीय विकल्पीय-द्वितीय-पक्षोपपादकतयाऽसाङ्गत्या-भावात्, न चेत्यादिशङ्का च न स्त्रचेत्याद्यस्मदीयग्रन्थानवलोकन-प्रयुक्ता। अतो न निरुक्तहेतुना व्यासादिनिष्ठाधिक्यप्रति-पादनवैफल्यम्। न द्वितीय इत्यादिकमपि तत्पक्षानङ्गीकारादेव निरस्तम्।

प्रश्न० शूद्राश्चेदुपदेश्यास्तर्हि सच्छूद्रा असच्छूद्रा वा? साधारणाश्चेदधमाः कुतो नोपदेश्याः? उपदेश्या एवेति चेत्तैः सह वैष्णवत्वेन तुल्यता न्यूनता वा? न्यूनत्वं चेत्? तत्कृत-पाकादि कथं नाङ्गीक्रियते? अङ्गीक्रियत एवेति चेत्? तर्हि वैष्णवदीक्षायां सर्वे वर्णाः समा इति वदन्तो भवन्तो धन्या इति।

दुर्ज० इति सप्तमं वाक्यम्। तत्रेदमुत्तरम्, शूद्राः सद-सत् साधारणेनोपदेश्या एव, तथापि चाण्डालादीनां नोप-देश्यत्वम्। अत्यन्तनिकृष्टानां तेषां दर्शनस्पर्शनसम्भाषणान-र्हाणां तद्व्याप्योपदेशासम्भवात्। सामान्यतः शास्त्रतः प्राप्तमप्यप-वादबलात् क्वचित् त्यज्यते। अपवादाभावेऽपि देशकालानुरोधे-नाप्यननुष्ठानं युक्तम्। यथाऽतिथिपूजायां शास्त्रतः प्राप्तं गवा-लम्भनं नानुष्ठीयते। त्रैवर्णिकादिसाधारणेन शास्त्रसिद्धमक्षत-योनि-विधवाविवाहादिकं न क्रियते। दशविधपुत्रेषु परि-गणितोऽपि पौनर्भवः क्षेत्रजोऽपि नाङ्गीक्रियते। अतोऽधमा नोपदेश्याः। वैष्णवत्वेन तुल्यता न्यूनता वा? न्यूनत्वं चेत् तत-

कृतपाकादिकं कथं नाङ्गीक्रियत इति यल्लिखितं तत्तुल्यत्व-मित्यत्र न्यूनत्वमिति लेखकप्रमादादागतं स्यात्। अत्रोत्तरम्, वैष्णवत्वेन तुल्यत्वेऽपि न हि तत्कृतपाकाङ्गीकारस्य विवाहादि-व्यवहारस्य वा प्रसक्तिः। सिद्धभैरवीचक्रे सर्ववर्णानां द्विजाति-त्वेन समत्वमङ्गीकुर्वाणा अपि कौला न हि विवाहादिव्यवहार कुर्वन्ति। सर्ववर्णैः न ह्यस्मत्सम्प्रदायिव्यतिरिक्ता अपि मनुष्यत्वेन तुल्यैश्चण्डालादिभिः कृतं पाकादिकमङ्गीकुर्वन्ति केचित् कान्य-कुब्जादयो ब्राह्मणत्वेन स्वसम्बन्धार्हकृतमपि पाकादिकं न भु-ञ्जते, वैष्णवत्वेन साम्यं नाम व्यक्त्यन्तरे वर्तमानो यो भगवत्प्रीति-विशेषस्तद्वत्त्वम्।

"समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।"

इति वदतो भगवत आश्रयणीयत्वे वर्णाश्रमज्ञानाद्यधिकारि-वैलक्षण्याधीनवैषम्यशून्यस्याश्रितेषु समानैव हि प्रीतिः। न हि तादृशी प्रीतिः मर्य्यादानां च लोकस्य कर्त्ता कारयिता च स इत्युक्तसर्ववर्णाश्रमादिमर्य्यादाव्यवस्थापक-तत्कृत-व्यवस्थाभञ्जिका स्यात्। वैष्णवदीक्षायां सर्ववर्णाः समा इति वदन्तो भवन्तो धन्या इत्यत्र धन्यपदेन व्यतिरेकलक्षणया अधन्या इत्युक्तं स्यात्, तदत्यन्तोपहसनीयम्। स्वर्णकरीषयोरपि द्रव्यत्वादिना साम्यं वदन्तमुपहसन् कश्चिदुपहास्य एव भवति, यद्यधमोत्तम-वर्णानां सर्वात्मना कश्चित् साम्यं ब्रूयात् स उपहसनीयः साधा-रणधर्मपुरस्कारेण साम्यं वदन्तमुपहसन् स्वयमेवोपहास्यो भव-तीति।

टी० "न जातिभेदं न कुलम्" इत्यारभ्य,—

"न देशकालौ नावस्थां योगो ह्ययमपेक्षते ।"

इति भारद्वाजसंहितावचनमभिप्रेत्याह,—शूद्राः सदसत् साधारणेनोपदेश्या एवेति । ननु तर्हि चाण्डालादीनामपि तदापत्तिरित्यत आह,—तथापीत्यादि । तत्र हेतुमाह, अत्यन्तनिकृष्टानामित्यादिना शिष्यमस्तकस्पर्शपूर्वकोपदेशस्य स्पर्शानर्हेऽसम्भवादिति भावः । ननु

"न जातिभेदं न कुलं न लिङ्गं न गुणक्रियाः"

इति सामान्यवचनेनाधमानामप्युपदेश्यत्वं प्राप्तं कथं त्यज्यत इत्यत आह,—सामान्यत इत्यादि । यथा 'यावज्जीवमग्निहोत्रं जुहोति' इत्यादिवचनप्राप्तमपि तस्माद्दीक्षित इत्यादिवाक्यबलात् त्यज्यते । तथा सामान्यतः प्राप्तमपि चण्डालस्योपदेश्यत्वं तद्दर्शनस्पर्शनादिनिषेधवाक्यबलादेव तद्ग्राह्यमपि त्यज्यत इति भावः । यथाऽतिथिपूजायामिति कलौ अतिथिपूजायां गवालम्भनस्य निषिद्धत्वादिति भाव । तत्तुल्यत्वमित्यचेति न्यूनत्वस्य पाकाद्यङ्गीकारहेतुत्वे चण्डालादीनां ब्राह्मणन्यूनत्वस्य सर्वाविगीततया भवतामपि चण्डालादिकृतपाकाङ्गीकारापत्तेरिति भावः ।

"प्रवृत्ते भैरवीचक्रे सर्वे वर्णा द्विजातयः ।"

इति वचनमभिप्रेत्याह,—सिद्धभैरवीचक्रे इत्यादि । नन्वेवं वैषम्ये कथं वैष्णवत्वेन साम्यमुच्यत इत्यत आह,—वैष्णवत्वेन साम्यं नामेत्यादि ।

"वर्णाश्रमाचारवता पुरुषेण परः पुमान्।
विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः॥
श्रुतिस्मृती ममैवाज्ञा यस्तामुल्लंघ्य वर्तते।
आज्ञाच्छेदी मम द्रोही मद्भक्तोऽपि न वैष्णवः॥
यथा हि वल्लभो राज्ञो नन्दी राज्ञां प्रवर्तिताम्।
लोकोपकारिणीं रम्यां बहुसस्यविवर्द्धनीम्॥
लङ्घयन् शूलमारोहेदनपेक्षोऽपि तां प्रति।"

इत्यादिकमभिप्रेत्याह,—न हि तादृशी प्रीतिरिति। स्वर्ण-करीषयोरित्यादि यथा स्वर्णं द्रव्यं तथा करीषमपीति वद-न्तमित्यर्थः।

सज्ज० इति रामानुजीयाः, शूद्राश्चेदुपदेश्या इत्यादिकं सप्तमं वाक्यम्। तस्यायमभिप्रायः। शूद्राः असाधारणधर्मपुर-स्कारेणोपदेश्याः साधारणधर्मपुरस्कारेण वा? यद्याद्यः, तदा स धर्मो निर्वचनीयः। यद्यन्तस्तदोपदिष्टेन मन्त्रेण तेषु साधार-णादिधर्मत्वेनाभिमतशूद्रत्वाद्यपलापपूर्वकं वैष्णवत्वं धर्मः संपा-द्यते, तदनपलापपूर्वकं वा? यद्याद्यस्तदा वैष्णवत्वनिरस्तशूद्र-त्वादिकैः सार्द्धं भवतां प्रसक्तं भोजनादिकं न केनापि वारयितुं शक्यते, लोकापवादरूपबाधकस्यापि तदानीमभावात्। तद्विल-क्षणधर्मविशिष्टे तादृशधर्मविशिष्टे न सहैकत्र भुञ्जाने तादृश-भोजनप्रयोज्यनिन्दाभावात् कस्यादर्शनात्। यद्यन्तस्तदा 'न शूद्राय मतिं दद्यात्' इत्यादिवचनैरुपदेशानर्हेषु यथोपदेष्टृत्वं भवतां तथा चाण्डालादिनिरूपितमुपदेष्टृत्वं स्वात्मनि प्रसक्तं

युक्तिमन्तरेण स्वयं वारयन्तो भवन्तोऽधन्या इति। यत्तु एतस्यो-
त्तरे प्रवृत्तैस्त्वेदमुत्तरमित्यारभ्यातोऽधमा नोपदेश्या इत्यन्तमुक्तं,
तदसङ्गतम्। दर्शनसम्भाषणादिव्याप्यत्वं यथोपदेशस्य तथा
शूद्रत्वाभावव्याप्यताया अपि न शूद्रायेति वचसोऽवगतेर्लोकाप-
वादरूपबाधकमवलम्ब्य शूद्रेष्वाचार्य्यत्वसंस्थापन-तत्कर्तृकपाका-
द्यनङ्गीकारस्य न्यायमन्तरेण वक्तुमशक्यत्वाच्च। लोकापवादस्यो-
भयत्र तुल्यत्वात् दृष्टान्तेष्वेकांशस्यैव लोकापवादेन बाधे वैष-
म्यात्। एतत्प्रश्नवाक्यावान्तरवाक्यस्य वैष्णवत्वेन तैः सह तुल्यता
न्यूनता वा? न्यूनत्वं चेत्? तत्कृतपाकादिकं कथं नाङ्गीक्रियते?
इत्यात्मकस्यायमभिप्रायो यदि तुल्यत्वं तदा भोजनादिकं,
स्पष्टतयैव प्रत्युक्तम्। अतस्तत्परिहाराय न्यूनत्वेऽपि भोजन-
स्यापादनं न्यूनत्वं चेदित्यादिना कृतम्। तच्चेत्थं यथा न्यूने-
ष्वाचार्य्यत्वं भवद्भिः प्रतिज्ञातम् तथा तत्कृतपाकादिकं कथं
नाङ्गीक्रियते इति। एतेन न्यूनत्वं चेत् तत्कर्तृकपाकादिकं
कथं नाङ्गीक्रियत इति यल्लिखितं तल्लेखकप्रमादागतम्; तद-
प्यपास्तम्। एतादृशोत्तरे प्रवृत्तैस्तत्रोत्तरमित्यारभ्य, पाका-
दिकं न भुञ्जत इत्यन्तं यदुक्तम्, तदपि पूर्वोक्तसमाधानैः समा-
हितं ज्ञेयं विद्वद्भिः। यच्चाप्यत्र वैष्णवत्वेन साम्यं नामेत्यारभ्य
भञ्जिका स्यादित्यन्तमुक्तं, तत्रोच्यते, 'समोऽहं सर्वभूतेषु' इत्यादि
वदतो भगवतो निरुक्तवैषम्यशून्यस्वाश्रितेषु समानैव या प्रीतिः
सा वर्णाश्रमादिमर्य्यादाव्यवस्थापक-तत्कृतव्यवस्थाभञ्जिका न
भवति। वैषम्ययुक्तानां भवतां वैष्णवत्वेन वैष्णवेषु या प्रवृत्तिः

शूद्रेष्वाचार्य्यत्वमङ्गीकर्त्तॄणां तैः सहभोजनमनङ्गीकुर्वताम् । 'उपनीय तु यो वेदं' 'न शूद्राय मतिं दद्यात्' इत्यादिपरमेश्वरकृत-व्यवस्थाभङ्गिकैव गीतेत्यवसेयम्। यच्चाप्यत्र वैष्णवदीक्षायां सर्वे वर्णा इत्यारभ्य स्वयमेवोपहास्यो भवतीत्यन्तमुक्तं तत्रोच्यते, स्वर्णकरीषयोर्द्रव्यत्वादिना साम्यं वदन्तमुपहसन्नैवोपहास्यो भवति। स्वर्णे द्रव्यत्वादिना तृणादिसाम्यं स्वर्णस्तेयित्वादिदोषादिगोपनार्थं वदन्नेवोपहास्यो भवति, न तु तमुपहसन्नित्यलमिति तत्खण्डनम् इति ।

व्या० शूद्राश्चेदुपदेश्या इत्यादिकमित्यारभ्येति तत्खण्डनमित्यन्तं प्रहसनप्रस्तावना। तस्यायमभिप्राय इत्यभिप्रायवर्णनं च गगनाम्भोरुहसौरभश्लाघा। शूद्रा असाधारणधर्मपुरस्कारेणेत्यादिविकल्पवाक्येन किमभिप्रेतं सच्छूद्रत्वादेरुपदेश्यतावच्छेदकत्वं पृष्टम्। यथा दण्डो दण्डत्वपुरस्कारेण पृथिवीत्वपुरस्कारेण वा घटं प्रति कारणमिति वाक्येन दण्डत्वादेर्घटकारणतावच्छेदकत्वम्। यद्वा ब्राह्मणं पुरस्कृत्य पुराणं श्रावयेदित्यादिनेवोपदेशे प्राधान्यं वा ? नाद्यः पक्षः समीचीनः चतुर्णामपि वर्णानामुपदेश्यत्वं वदतोऽस्मान् प्रति उपदेश्यत्वाव्यापकस्य शूद्रत्वादेरुपदेश्यतावच्छेदकत्वप्रश्नानुपपत्तेः। न द्वितीयः, उपदेशक्रियाऽयोग्यस्य शूद्रत्वादेः पुरस्करणासम्भवात्, न चासाधारणधर्मपुरस्कारेणेत्यादिना तादृशधर्मवैशिष्ट्यमात्रं विवक्षितमिति वाच्यम्, तथा सति सच्छूद्रत्व-शूद्रत्व-मनुष्यत्व-पुंस्त्व-द्रव्यत्वादिविशिष्टानामेवोपदेश्यत्वमिति तादृशविकल्पासम्भवात्।

न हि कश्चित् बालोऽपि दण्डो दण्डत्वविशिष्टः पृथिवीत्वविशिष्टो द्रव्यत्वादिविशिष्टो वा कारणमिति ब्रूयात्। अस्तु यथाकथञ्चित् तद्वाक्यप्रयोगस्तथाप्याद्यपक्ष-दूषणमुपदेश्यनिष्ठं तत्तद्व्यक्तित्वमिति धर्मनिर्वचनेन परिहार्य्यं प्रत्येकविश्रान्त-तद्व्यक्तित्वस्योपदेश्यतावच्छेदकत्वासम्भवस्तूपदेश्यत्वन्यूनवृत्ति-शूद्रत्वादेरपि तुल्यः। न च शूद्रमात्रवृत्त्युपदेश्यतावच्छेदकमनुगतं पृष्टमिति वाच्यम्, द्वयोस्त्रयाणां चतुर्णां कतिपयानामुपदेश्यतायामनुगतावच्छेदक-प्रश्नस्याप्यापत्तेः। अन्त्यपक्षदूषणं चातिसाहसिकत्वं भवतामावेदयति। मन्त्रेण हि उपनयनादिसंस्कारकर्मणा द्विजत्वमिव वैष्णवत्वमुक्त-प्रीतिविशेषरूपं जायताम्, तदविरोधिनः शूद्रत्वादेरपलापः किमिति कर्तव्यः। यद्वा रक्तोत्पादकेनाग्निना वा तेन रक्तोत्पादविरोधि-श्यामादिकमेव नाश्यते। न तु तदविरोधि-घटत्वैकत्वपृथिवीत्वादिकमपि शूद्रयोनिप्रभवत्वरूप-शूद्रत्वादेर्वैष्णवत्वेन विरोधो नास्त्येव। अत्राद्यपक्ष-दूषणमपि धूमरेखया रज्जुनिर्माणतुल्यम्। वैष्णवत्वनिरस्त-शूद्रत्वकैः सार्द्धं भवतां प्रसक्तं भोजनमित्यत्र किं प्रसञ्जकं? न तावत् केवलवैष्णवत्वम् अव्यभिचरित-सामानाधिकरण्यस्य ग्राहकाभावात् कुत्रचिदधिकरणेषु भूयोदर्शनेन हि तद्ग्रहः स्यात्। तथा च मूलशैथिल्यं, नापि शूद्रत्वाभावमात्रं भवतामप्यापत्तेः। नापि वैष्णवत्वप्रयोज्यत्वविशिष्ट-शूद्रत्वाभावः विशिष्टापादकाप्रसिद्धेः। यदि भवतां क्वचित् प्रसिद्धिरस्ति तदा तुल्यैव भवतामपीयमापत्तिः, न केनापीत्यादिकं तु युक्त-

तरम्। न हि कोऽपि वैद्यो वन्ध्यासुतरोगनिवर्हणायालम्। लोकापवादेत्यादिकमपि वृथैवोत्थानम्। कस्यादर्शनादित्यनन्वितम्। बाधकस्येत्यत्र कस्येति लेखकप्रमादादापतितं चेद्भवतु। यद्यन्य इत्यादिकमप्यसत्। न शूद्रायेत्यादिना च न मतिसामान्यं निषिध्यते त्रैवर्णिकसेवादिरूपशूद्रधर्माणामप्यनुदेश्यत्वापातात्। इष्टापत्तौ तद्बोधकप्रमाणबाधः। अतो ब्राह्मणादिमात्राधिकारकवैदिकधर्मोपदेश एव तेन वार्य्यते। अतएव,—

"न स्वरः प्रणवोऽङ्गानि नाप्यन्यविधयस्तथा।
स्त्रीणां शूद्रादिजातीनां मन्त्रमात्रोक्तिरिष्यते॥"

इत्यादिकमुपपद्यते चण्डालादिनिरूपितोपदेष्टृत्वप्रसक्तिस्तु सूतादीनां धर्मशास्त्रं पुराणमुपदिशतां श्रीवेदव्यासादीनां तुल्यैव। तां वारयन्तो भवन्तः प्रथममधन्याः। यत् तु यत्वेतस्योत्तर इत्यादिनोक्तमित्यन्तेन किञ्चिदनूद्य तदसङ्गतमिति प्रतिज्ञाय तदुपपादकतया दर्शनसम्भाषणादीत्यादिकमुक्तम्। तदाशामोदकचर्वणेन पुष्प्याशासनम्। कथं न शूद्रायेति वचनं कुत्रापि पक्षपातशून्यं भवदभिमतामपि सूतादौ मशामुपदेशे शूद्रत्वाभावव्याप्तिमवगमयेत्। लोकापवादरूपेत्यादिकमपि बाधितार्थकम्। न हि शूद्रेष्वाचार्य्यत्वमस्माभिर्व्यवस्थापितम्। प्रत्युत क्षत्रियादेरप्याचार्य्यत्वं न सम्भवतीति खलु सोपपत्तिकमुक्तम्। किं च लोकापवादरूपबाधकमवलम्ब्य शूद्रेष्वाचार्य्यत्वसंस्थापनाभिधानं च भवतामारोपमात्रम्। तत्कर्तृकपाकाद्यनङ्गीकारोऽयं न्यायमवलम्ब्य भवद्भिः शक्यते वक्तुम्। तमेव न्यायमव-

त्वम्वयाऽस्माभिरपि शक्यते वक्तुम्। भवद्भिरपि मनुष्यत्वेन सजातीयैः पुत्रदारादिभिः पक्वमोदनादिकं भुञ्जानैः शूद्रपक्वं कुतो न भुज्यते इति पृष्टैः किञ्चिद्वक्तव्यम्। लोकापवादस्योभयत्र तुल्यत्वादिति। अत्रोभयत्रेत्यनेन किं विवक्षितम्। शूद्रेष्वाचार्य्यत्वसंस्थापनं तत्कृतपाकाद्यनङ्गीकारश्चेति चेन्न तर्हि तुल्यत्वम्। शूद्रेष्वाचार्य्यत्वसंस्थापनं तत्कृतपाकाद्यङ्गीकारश्चेति चेन्न अङ्गीकारस्य प्राधान्येन पूर्व्वमनिर्देशात्। प्रागपि लोकापवादरूपबाधकमवलम्बेरित्यपि नानङ्गीकारे अन्वेति अयोग्यत्वात्। अङ्गीकारस्तु न प्रधानभूत इत्यसाङ्गत्यम्। शूद्रेष्वाचार्य्यत्वसंस्थापनं तत्कृतपाकादि च तयोरनङ्गीकार इत्युक्तौ न वयमधिक्षेप्याः। इदानीं भवतामेवाधिक्षेप्यत्वात्। तत्र न्यायान्वेषणस्य भवतामप्यावश्यकत्वाच्च दृष्टान्तेष्वित्यादिकमपि प्रलापमात्रम् "प्रलापोऽनर्थकं वचः" तदुभयोर्दृष्टान्तत्वे दार्ष्टान्तिकानुपलब्धेः। एतत्प्रश्नवाक्येत्यादि तदप्यपास्तमित्यन्तं नरविषाण-शाणचक्रेण खरविषाणवाणतैक्ष्ण्य एवापादनम्। यदि तुल्यत्व तदाऽभोजनादिकं कथं प्रत्युच्यते तुल्यत्वं, यदि भोजनं नियमेनापादयति, मनुष्येषु भवत्स्वपि तदापादयेदेव तत्। परिहाराय•न्यूनत्वेऽपि भोजनस्यापादनम् इत्यत्र किमापादकमभिप्रेतम्। न्यूनत्वमेवेति चेत्? भवतामपि तुल्यम्। तच्चेत्यादिना तदुपपादनं चान्धस्य जात्यन्धेन यष्टिप्रदानम्। न हि न्यूनेष्वाचार्य्यत्वं कुत्रचिदस्माभिः प्रतिज्ञातम्, किन्तु व्यक्तिविशेषे मुक्तावस्थायां श्रूयमाणं तत् तुल्यत्वमित्यादिन्यायेन धर्मव्याधादिदृष्टान्तेनोप-

पादितम्। किं च यदि भवन्तो न्यूनेषु आचार्य्यत्वं प्रति आनीयुस्तर्हि तत्कृतपाकादिकमङ्गीकुर्य्युरिति तर्को भवदभिप्रेतो न सम्भवति मूलशैथिल्यात्। न ह्यापादके आपाद्यस्य व्याप्तिर्महानसादौ धूमे वह्नेरिव क्वचित् गृहीता न च शङ्कनीयम्। अस्मास्वधिकरणेषु आपाद्यापादकयोर्व्यतिरेक-व्याप्तिर्गृहीतेति तर्कं प्रति पक्षे आपाद्यव्यतिरेकनिर्णयस्य कारणतया तत्कृत-पाकाद्यनङ्गीकारवत्तया निश्चितेषु अस्मासु तादृशप्रतिज्ञारूपापादकाभावस्याभावेन तस्यापाद्याभावाव्यापकत्वात्, एतादृशोत्तरे प्रवृत्तेरित्यारभ्य ज्ञेयं विद्वद्भिरित्यन्तम् गन्धर्वनगरान्तरविषाण-कृत-शिविकामारुह्यागतैर्वन्ध्यापुत्रैः खरशशविषाण-शरचाप-पाणिभिर्दृढतरवज्र-शूराधिष्ठित-नगरावरोधवदुपहास्यम्, किन्तु स्वयं विद्वन्मन्यैर्भवद्भिरेव ज्ञेयम्। यत्तु यच्चाप्येत्यादि अव-सेयमित्यन्तं तदप्यसमञ्जसम्। वैषम्ययुक्तानां भवतामिति नास्माकमुपालम्भः सर्वेषां केनचिदाकारेण वैषम्यस्यावश्यकत्वात् वैष्णवत्वेन वैष्णवेषु प्रवृत्तिस्तत्तदनुगुणसत्कारादौ प्रवृत्ति-र्नान्या। न सा परमेश्वरव्यवस्थाभञ्जिका। या तु तद्भञ्जिका मद्यपानादिगोचरा साऽस्मासु नास्त्येव। शूद्रेष्वाचार्य्यत्वमङ्गी-कर्त्तृणामिति केयं शवमृष्टिः या शतशो दग्धापि न दह्यत इव "उपनीयतु यः शिष्यम्" इत्यादिवचनं च नाचार्य्यलक्षणपरं श्वेतकेतु-नारदाद्याचार्य्येषु सद्विद्याभूमविद्याप्रदेषु उद्दालक-सनत्कुमारादिष्वव्याप्तेः, किन्तु तल्लक्षणस्य लक्ष्यविशेषनिर्देश इत्यावेदितम्, न शूद्रायेति वचनमपि विद्याविशेषनिषेध-

परमित्यनुपदमुक्तम्। तत्रोच्यते स्वर्णकरीषयोरित्यादिकमल-मित्यन्तमसारम्। यथा स्वर्णं द्रव्यं तथा करीषमपीति केनचित् प्रामाणिकेनोक्तौ स्वर्णस्तेयित्वादिदोषादिगोपनार्थमयमेवं वदतीति कश्चिद्विद्याह्लवतो विनेति।

प्रश्न० सच्छूद्रा इति चेत्? के सच्छूद्रा इति तेषां लक्षणं वक्तव्यमिति।

दुर्ज० इत्यष्टमं वाक्यम्। अत्रोत्तरम्, यदि वयं सच्छूद्राणामेवोपदेश्यत्वं वदन्तो वयं न विशेषान्तरव्यावृत्तिकविशेषान्तरधर्मं प्रष्टव्याः। एतदुत्तराभिधानेऽपि यदि भवन्तः सच्छूद्राणामपि तत्तद्व्यक्तिलक्षणं पृच्छेयुस्तदा तदुत्तराभिधानस्य महान् कालोऽपेक्षितः स्यात्। यदि सच्छूद्रलक्षणज्ञानं भवतामभिष्टम्, तदा मन्वादिप्रसिद्धग्रन्थावलोकनेनैव भविष्यतीत्युपरम्यत इति।

टी० यदि वयमित्यादिघटो जलाहरणकरणमिति केनचिदुक्तौ कश्चित् को घटः? इति पृच्छति, कम्बुग्रीवादिमान् घट इति वदत्यपरः। न तु कः स्वर्णघटः? इति पृच्छति, तदुत्तरमपि वदति। एवं शूद्रा उपदेश्या इत्युक्तौ के सच्छूद्रा? इति प्रश्नस्य तदुत्तरस्य च नात्रावकाश इति भावः। विशेषान्तरव्यावर्तकेति विशेषान्तरविरुद्धेत्यर्थः। एतदुत्तराभिधानेऽपीति प्रकृतार्थाऽनुपयुक्तधर्मजिज्ञासायां तदनुपयुक्तत्वाविशेषात् तत्तद्व्यक्तिलक्षणजिज्ञासा केन वारयितुं शक्येति भावः।

सज्ज० इति रामानुजीयाः, यत्तु, सच्छूद्रा इति चेत? के

सच्छूद्रा ? इति तेषां लक्षणं वक्तव्यमित्यष्टमवाक्योत्तरेऽक्ति-
र्यदि वयं सच्छूद्राणामेवोपदेश्यत्वं ब्रूमस्तदा तल्लक्षण-जिज्ञासो-
चिता भवतीत्यारभ्य, “प्रष्टव्या” इत्यन्तकमुक्तं तन्नास्माकमसर्वज्ञ-
त्वेन भवदभिमतस्य सदसच्छूद्रसाधारण्येनोपदेश्यत्वस्य कथमपि
ज्ञानासम्भवेन तादृशजिज्ञासाया उचितत्वात्। यदप्येतदुत्त-
राभिधान इत्यारभ्य, महान् कालोऽपेक्षितः स्यात् इत्यत्यन्त-
कमुक्तम्, तदप्यसङ्गतम्। तादृशजिज्ञासोत्थापकस्य कस्यचि-
दभावात्। यच्चापि यदि सच्छूद्रेत्यारभ्योपरम्यत इत्यत्यन्त-
कमुक्तं तदसङ्गतम्। मन्वादिप्रोदितसच्छूद्रत्वप्रयोज्य-भवत्कर्तृ-
कोपदेशनिरूपितकर्मत्वस्याङ्गीकारे शूद्रत्वावच्छेदेन भवदभिमत-
स्योपदेश्यत्वविषयकप्रतिज्ञाया हान्यापत्तेः। शूद्रत्वाप्रयोज्यभवत्-
कर्तृकोपदेशनिरूपितकर्मत्वस्याङ्गीकारे शूद्रमात्रे विष्णुप्रीतिवि-
शेषविषयत्वरूपवैष्णवत्वस्य न्यूनाधिकभावमुपेक्ष्य शूद्राचार्य-
संग्रहार्थं भवतामवश्यं स्वीकर्तव्यतया मन्वादिप्रोदितसच्छूद्रादि-
लक्षणानां वैयर्थ्यापत्तिरित्यलमिति तत्खण्डनम् इति।

व्या० यत्तु सच्छूद्रा इति चेदित्यादिना इत्यत्यन्तकमुक्त-
मित्यन्तेनास्मदुक्तमनूद्य तन्नेत्यादिना यदुक्तं तत्तुच्छम्। भवता-
मसर्वज्ञत्वेनास्मदभिमत-सदसच्छूद्रसाधारण्येनोपदेश्यत्वस्य कथ-
मपि ज्ञानासम्भवे भवदुपदेश्याः सच्छूद्रा असच्छूद्रा वा? प्रथमे
के सच्छूद्राः ? द्वितीये केऽसच्छूद्राः ? इति भवद्भिः प्रष्टव्यम्।
तदभावात् सच्छूद्रा एतदुपदेश्या इति भवतां भ्रमो जातः सोऽ-
स्माभिर्निवारितः। पूर्वपूर्वप्रश्नस्योत्तरलाभे तत्सङ्गतार्थान्तरप्रश्नः

कर्त्तव्यो भवति लोके। ननु एतत्पूर्ववाक्येन शूद्राश्चेद्भवदुपदेश्यास्तर्हि सच्छूद्रा असच्छूद्रा वा इति सर्वं प्रष्टव्यमिति चेत् सत्यम्, तथाप्यसच्छूद्रत्वलक्षणं भवद्भिर्न पृष्टम्। किं च साधारणाश्चेदिति तद्वाक्यखण्डेनास्मदभिप्रायमुत्प्रेक्ष्य-तदुपरि दूषणमभिहितमिति असाधारणपक्षद्वयोत्थापनमावश्यकम्। ननु सच्छूद्रलक्षणे ज्ञाते तद्भिन्न-शूद्रत्वरूपमसच्छूद्रत्वं सुज्ञेयमिति चेन्नासच्छूद्रत्वलक्षणपरिज्ञानेऽन्यस्यापि सुज्ञेयत्वात्। यत्तु एतदुत्तराभिधान इत्यारभ्येत्यादिनास्मदुक्तमनूद्य तदप्यसङ्गतमिति प्रतिज्ञाय तदुपपादकतया जिज्ञासोत्थापकस्य कस्यचिदभावादित्युक्तम्, तदसङ्गतम। प्रथमं भवदुपदेश्याः के? इति प्रश्नः कृतः। तस्य चत्वारो वर्णा उपदेश्या इत्युत्तरमभिहितम्। अनन्तरं च शूद्राश्चेदुपदेश्यास्तर्हि सच्छूद्रा असच्छूद्रा वा? इति प्रश्नः कृतः। तत्रापि शूद्रत्वावच्छेदेनोपदेश्यत्वमुक्तम्। अनन्तरं सच्छूद्रा इति चेदित्यादिना स्वयमेव जिज्ञासोत्थापिता नत्वस्मदुक्तोत्तरवाक्यार्थज्ञानं तदुत्थापकम्। एवं सति सच्छूद्रलक्षणेऽस्माभिरभिहिते सच्छूद्रेषु का का व्यक्तिर्भवदुपदेश्या? व्यक्तिविशेषा इति चेत्? कास्ता व्यक्तय इति तल्लक्षणं वक्तव्यमिति। व्यक्तिविशेषजिज्ञासोत्थापकस्यापि भवद्वाक्यस्य सम्भवात्। यत्तु यच्चापीत्यादिना इत्यत्यन्तकमुक्तमित्यन्तेनास्मदुक्तमनूद्य तदप्यसङ्गतमिति प्रतिज्ञाय मन्वादीत्यादिना तदुपपादकमिव किञ्चिदुक्तम्, तदप्युपहास्यम्। न ह्यस्माभिरस्मत्कर्तृकोपदेशस्य तत्कर्मत्वस्य वा मन्वादिप्रोदित-सच्छूद्रत्वप्रयोज्यत्वमङ्गीकृतम्।